# नन्दनवनकल्पतरुः ४७

शासनसम्राजामिह, समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ।।



वि.सं. २०७८
दक्षिणायनम्

सङ्कलनम्
पन्न्यासकल्याणकीर्तिविजयः गणी

# मर्म गभीरम्

- कल्याणकीर्तिविजयः

कश्चन साधकः स्वजीवनसारं प्राप्तुमाश्रमे कुत्रचिदुषित्वा सप्ताष्टौ वर्षाणि स्वाध्याय-ध्यानादिकां साधनां कृतवान् । तत आश्रमवरिष्ठैः स गुरुपार्श्वे गन्तुमनुमतः, तेन साधनाया रहस्यं प्राप्येत गुरुकृपयेति कृत्वा ।

स गुरोरपवरकं प्राप्य गुरुं वन्दितवान् तत्सम्मुखं च स्थितवान् । गुरुरपि तं दृष्ट्वा सस्मितं पृष्टवान् - अस्माद् वातायनाद् बहिः किं दृश्यते भवता ? साधकेन दृष्टं यद् - बहिरुत्तुङ्गः पर्वतः, महान् जलप्रपातः, इतस्ततः प्रवहन्तो निर्झराः, परितः प्रसृता च हरितवर्णा वनराजिर्विलसन्ति ।

तेनोक्तं - गुरवः ! वातायनाद् बहिर्बृहत्कायः पर्वतः, करालतया प्रपतन् महान् जलप्रपातः, रम्या निर्झराः, सौन्दर्यमण्डिता च वनराजिर्दृश्यन्ते । गुरुस्तद्वदनमेव निरीक्षमाणस्तमुक्तवान् - भवत इतोऽपि वर्षद्वयं ध्यानसाधनमावश्यकम् । आश्रमे स्थित्वा ध्यानसाधनं करोतु, ततोऽत्राऽऽगच्छतु ।

कुत्र स्खलना जाता, किं वाऽसमञ्जसं कृत-मिति गुरवो न कथयन्ति स्म । स्वयमेव स्वीयं न्यौन्यं शोधनीयं - हृदयगह्वरे निमज्ज्य - इति तस्य निःशब्दं सूचनम् । वर्षद्वयं यावत् स गभीरं ध्यानं कृतवान् । तावता तस्य हृदये स्फुरितं यत् प्रत्येकं वस्तु क्षणविनश्वरं विद्यते । तत्कथं पर्वतो जलप्रपातो निर्झरादिकं वा सम्भवेत् ? तत्र तु किमपि न विद्यते इत्येव कथनीयमासीत् ।

वर्षद्वयानन्तरं स पुनरपि गुरुपार्श्वं गतः । गुरवस्तु तस्य तदेव पृष्टवन्तः । तेनोक्तं - गुरवः ! तत्र किमपि नास्ति - इति । गुरुभिः कथितं - पुनर्वर्षद्वयं ध्यानसाधनं करोतु ।

इदानीं किं कर्तव्यम् ? किमपि विद्यते - इति न स्वीकृतं, न विद्यते - इत्यपि न स्वीकृतम् । पुनरपि स वर्षद्वयं ध्यानगह्वरे निमग्नो जातः । ततश्च का स्खलना जातेत्यवबुद्धं तस्य । गुरुचरणयो-रुपस्थितः स पुनः । गुरवस्तु तस्य तदेव पृष्टवन्तः । तेनोक्तं - पर्वतः, प्रपातः, निर्झराः वनराजिश्च । तन्मुखरेखा एव विलोकयन्तो गुरवः सस्मितमुक्तवन्तः - सत्यमुक्तं भवता ।

ततो गुरवस्तस्य साधनाया रहस्यमवगन्तुमावश्यकान् पाठान् पाठितवन्तः ।

प्रथममन्तिमं चोत्तरं समानमेव तथाऽपि प्रथमवारं गुरवस्तद्वदननिरीक्षणेन - तत्र रागोऽस्तीति लक्षितवन्तः । द्वितीयवारं तु वास्तवस्याऽस्वीकार आसीत् । तृतीयवेलायां गुरवो लक्षितवन्तो यदि-दानीमयं राग-द्वेषरहिततया माध्यस्थ्यमाश्रित उदासीनश्चाऽस्तीति । एतदेव शिक्षणीयमासीत् तस्य ।

----------

**नन्दनवनकल्पतरुः** ४७

(षाण्मासिकी अयनपत्रिका) (दक्षिणायनम्)

**सङ्कलनम्** पंन्यासः कल्याणकीर्तिविजयः

प्रकाशनम् - **श्रीअभ्युदयशिक्षणनिधिः, भावनगरम्**

**वि. सं.** २०७८, **ऐ.सं.** २०२१

**मूल्यम्** ₹ 125 /-

**अस्मिन् जालपुटे उपलभ्यते** – **www.jainelibrary.org**

email : nandanavanakalpataru99@gmail.com

**सम्पर्कसूत्रम्** **पं. कल्याणकीर्तिविजयः**

C/o Sandeep D Shah
Plot # 227, # 502 Balaji Sadan, Opp SIES School, KAS Road,
King's Circle, Matunga,Mumbai 400019.
Mo. 9820775295

**प्राप्तिस्थानम्** निखिल स्टोर्स
पीरछल्ला शेरी, भावनगर 364001
दूरभाष-क्रमाङ्कः 9879222018

**मुद्रकः** मनन राठोडः
प्रिन्स ओफसेट, भावनगरम्
दूरभाषः 9377115737

# वाचकानां
# प्रतिभावः

मान्यवर ! नमो नमः । नन्दनवनकल्पतरोः ४६तमी शाखा प्राप्ता ।

**सोऽहं न किं स्याम् .....?, कदम्बोऽनिशं राजते शैलराजः, श्रीफलवर्द्धिपार्श्वनाथ-माहात्म्यं** तथा च **मयूरदूतम्** – इत्येतानि काव्यानि कृतवन्ति मनो मे प्रसन्नतापूर्णम् ।

अन्येऽपि च लेखाः प्रशंसामर्हन्ति ।

भवतां सर्वेषां संस्कृतसेवा वन्दनार्हा ।

**अनिलस्य** प्रणामाः

**( अनिलः र. द्विवेदी,**

**जामनगरम् )**

*************

सवन्दनं निवेद्यते, नन्दनवनकल्पतरोः ४६तमी शाखाऽवाप्ता । संस्कृतभाषाप्रेमिणां कृते एषोऽङ्कः कल्पवृक्ष इव नितरां प्रसन्नकरो ज्ञानवर्धकश्च । अस्मिन्नङ्के उत्तमा लेखाः सन्ति, विषयवैविध्यं चाऽपि प्रमोदप्रदं, मुद्रणशुद्धिश्चाऽप्युत्कर्षस्य मानदण्ड इव विलसति ।

मर्म गभीरम् – इति लेखः साधोः सुचरितं चन्दनमिव सुगन्धं प्रसारयति । गृहस्थानां कृतेऽपीदृशाः प्रसङ्गा दैनन्दिनव्यवहारेऽहिंसामूलकत्वादतीवोपयोगिनो भवन्ति ।

एवमन्येऽपि विविधसाधुजनैर्लिखिता लेखाः कथाः काव्यानि च सर्वथा मनस्तोषकराणि सन्ति । यद्यपि सर्वत्र सन्धिबाहुल्यमर्थावगमने किञ्चन काठिन्यं जनयति, तथाऽपि देवभाषायाः सन्ध्यात्मकस्वरूपमेव विद्वज्जनसम्मतमिति मत्वा मयैव भाषाभ्यासेऽधिकमवधानं दातव्यमिति शम् । प्रणमामि ।

**प्रा.मधुसूदनो व्यासः**

**(मोडासा)**

************

# आर्थिकं सौजन्यम्

नन्दनवनकल्पतरोः ४७तम्याः शाखायाः प्रकाशनार्थं
पूज्य-पंन्यासप्रवरश्रीचन्द्रकीर्तिविजय-गणिवर्याणां सत्प्रेरणया सिंहपुर(शिहोर)नगरस्थस्य नानी-मोटीदानशाला-उपाश्रयस्य श्राविकाभिरार्थिकः सहयोगः कृतोऽस्ति। एतदर्थं बहुशो धन्यवादाः ॥

# प्रास्ताविकम्

...... इतोऽप्येकं वर्षं समाप्तम् । इदानीं समयोऽस्ति गतवर्षस्य लाभ-हान्योर्विचार्णार्थम् । जीवनस्योन्नत्यवनती परीक्षितुम् । नाऽत्र किल भौतिकं लाभ-हान्यादिकं विचारणीयमस्ति । विचारणीयं त्वेतदस्ति यद् – अस्माभिर्व्यतीते वर्षे तादृशं किं वा कृतं येन हृदयं तृप्तिमनुभवत् सार्थक्यं सम्पूर्णतां च भजेत ? तच्च न हि तथा विशालं विराटं वा किन्तु परिपूर्णम् ? जगत्यस्माकं यशः प्रसरेत् – नैव तादृशं, किन्तु, येनाऽस्माकं हृदयं सोत्साहं सोल्लासं च विलसेत् – तादृशम् ?

बहुशो वयमिदानींतन-लाभं विलोकयन्तो मूल्यवतो भाविलाभान् सर्वथोपेक्षामहे । इह जगति खल्वस्माकं दौर्भाग्यादेकं वस्तु तादृशमस्ति यस्य प्रमाणं शतं प्रतिशत(100%)मस्ति । तच्चाऽस्ति मृत्युः ।

वयं हि – जीवनं क्षणभङ्गुरमस्ति – इति सुतरां जानीमः, तत्प्रतिपक्षतया - जीवनस्य प्रियं कार्यं कर्तुमस्माकं पार्श्वे क्षणमस्ति वर्षशतं वेति सर्वथा नैव प्रतीमः । कीदृशं कार्यमस्माकं कृते प्राधान्यं भजेत् ? कीदृशस्य कार्यस्य कृतेऽस्मद्धृदये आदराधिक्यमस्ति ? – इति चिन्तनीयमस्ति ।

अमेरिकीययैकया केन्डी-चिन्ग्-नामिकया विश्वविश्रुतया कलाकारया स्वीयं कार्यं कुर्वाणया सततं चिन्तयते स्म यद् – जनाः केवलमुदरपूरणार्थं भौतिकसुखभोगार्थं चैव जीवन्त्युत स्वजीवनस्य प्रयोजनं शोद्धुं तदर्थं च मथनं कर्तुं चाऽपि ते प्रयतन्ते किल ? एतदर्थं तया न्यू-ओरलिअन्स्-क्षेत्रे स्वगृहस्य समीपवर्तिनि स्वाम्यरहितस्य कस्यचित् खण्डगृहस्य राजमार्गस्य पुरतः स्थितायां भित्तौ विशालमेकं कृष्णफलकं निर्मापितम् । तत्र फलके उपरिष्टाद् वाक्यमेकं खटिकया लिखितं - " मरणात् पूर्वमहं ........................" – इति, तत्र च रिक्ते स्थाने तद्वाक्यं पूरयितुमपि तयाऽवकाशः कल्पितः । बहवो जनास्तत्र निजामिच्छां, स्वप्नान्, विचारान्, आकाङ्क्षाश्च प्रस्तोतुं शक्नुयुस्तादृशो विशालो विराटश्च सोऽवकाश आसीत् । फलकोपरि लिखितुं बहूनि खटिकाखण्डानि चाऽपि निहितानि ।

तन्मनसि भयमासीद् यज्जना फलकं भञ्ज्युस्तन्नाशं वा कुर्युः, परं तथा न जातम् । शनैः शनैर्जनास्तत्फलकोपरि स्वीयामन्तरिकीमिच्छामभिव्यक्तुं समारब्धाः, यथा –

मरणात् पूर्वमहं ...........

- अहं लक्षशो जनानां समक्षं गानं कर्तुमिच्छामि .......
- अहं ग्रन्थसर्जनं कर्तुमिच्छामि .......
- अहं जीवनरहस्यं बोद्धुमिच्छामि .......
- अहं निजमात्रे कथयितुमिच्छामि यदहं तस्यां स्निह्यामि .......
- अहं मे मित्रं कथयितुमिच्छामि यदहं तं वञ्चितवान् ...... इत्यादि ..... ।

अद्यत्वे हि विश्वस्य पञ्चसप्तत्यधिकेषु देशेष्वनेकत्र ईदृशि फलकानि स्थपितानि सन्ति । तेषां माध्यमेन कोट्यधिकानां जनानां चिन्ताः, इच्छाः, पीडाः, विचाराः, स्वप्नाश्च ज्ञातास्तया । ततश्च जीवनस्य प्रयोजनं किमिति संशोधितं तया ।

सा वदति – जीवनं खल्वस्माकं पुरतो विकल्पद्वयं प्रस्तौति – प्रथमं तावज्जीवनेऽस्माभिः किञ्चनाऽनुपमं सर्जनं कर्तव्यम् - अथवा - जीवनमेवाऽद्भुततयाऽपूर्वतयाऽनुपमसर्जनतया वा जीवितव्यमस्माभिरिति ।

चलन्तु , अद्य, नूतनवर्षस्य प्रारम्भे वयमपि केन्डी-चिन्ग्-इत्यनया प्रेषितमिदमुपायनं प्राप्य गृहे एकं फलकं कल्पयामः, तत्र च –

अस्मिन् वर्षेऽहं ........... करिष्यामि – इति लिखित्वा रिक्तस्थलम्, अस्मिन् वर्षे वयं नूतनं यच्चिकीर्षामस्तच्चिन्तयित्वा पूरयेम, ततश्च तदेव चिकीर्षितं कर्तुं समग्रतया यतेमहि जीवनं च परिपूर्णं कुर्याम ॥

**कल्याणकीर्तिविजयः**

नूतनवर्षारम्भः, कार्तिकशुक्ला प्रतिपत्
वि.सं. २०७८
अहमदाबाद-महानगरम्

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| विभक्तिसप्तकेन जिनस्तुतिः | **स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः** | 1 |
| श्रीकदम्बगिरिस्तोत्रम् | **स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः** | 2 |
| श्रीसीमन्धरस्वामि-उपासना | **कल्याणकीर्तिविजयः** | 4 |
| श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम् | **वाचकश्रीसहजकीर्तिगणी** | 6 |
| श्रीविजयनेमिसूरीश्वराणां स्तुत्यष्टकम् | **मुनिः वाचस्पतिविजयः** | 12 |
| श्रीविजयलावण्यसूरीश्वराणां स्तुत्यष्टकम् | **मुनिः वाचस्पतिविजयः** | 14 |
| पुष्पसौरभम् | **डा.गदाधरः त्रिपाठी** | 16 |
| शिशुगीतानि | **प्रा.अभिराज-राजेन्द्रमिश्रः** | 17 |
| हाइकु-काव्यानि | **मुनिः शीलचन्द्रविजयः** | 23 |
| श्लोकमयं पत्रम् | **पण्डितः चन्द्रशेखर-झा** | 24 |
| मयूरदूतम् (खण्डकाव्यम्) | **स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः** | 26 |
| आस्वादः | | |
| सारग्राहिणी द्वात्रिंशिका | **मुनिमुक्तिमण्डनविजयः** | 36 |
| भाव-प्रतिभावौ | **सा.हंसलेखाश्रीः** | 38 |
| मनोगुप्तिः | **सा.विजयलेखाश्रीः** | 40 |
| ग्रन्थसमीक्षा | | |
| विचारोपायनम् | **प्रा.मधुसूदनः म. व्यासः** | 42 |
| शब्दपूरणी | **मुनिः निर्ग्रन्थचन्द्रविजयः** | 44 |
| काव्यानुवादः | **कल्याणकीर्तिविजयः** | 46 |
| कथा | | |
| दिव्योंऽशः | **मुनिः शीलचन्द्रविजयः** | 47 |

| | | |
|---|---|---|
| मानवसेवा | मुनिः त्यागमण्डनविजयः | 49 |
| स्वार्थ-निःस्वार्थौ | मुनिः आत्मकीर्तिविजयः | 51 |
| प्रारब्धात् पुरुषार्थो बलीयान् | मुनिः भव्ययशविजयः | 53 |
| यस्त्यजति स श्रेष्ठः | सा.तत्त्वार्थमालाश्रीः | 54 |
| मर्म नर्म | कल्याणकीर्तिविजयः | 57 |
| प्राकृत-विभागः | | |
| पंचपरमिट्ठि-थुत्तं | स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः | 59 |
| सिरिसंतिजिणथुत्तं | स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः | 60 |
| आयरिया सिरि उदयसूरिणो | सा.हेमपूर्णाश्रीः | 62 |
| पाइय-विन्नाण-कहा | आ.श्रीविजयकस्तूरसूरयः | 64 |
| भोजराय-दासी-संवाओ | सा.हेमपूर्णाश्रीः | 72 |

विभक्तिसप्तकेन

# श्रीजिनस्तुतिः

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरिः

श्रीमन्महामदक्लेश-मुक्तं जिनं स्तुवेऽद्भुतम् ।
यः सर्वदा जगज्जन्तु-जीवातुरभवद् भवे ॥१

यं धीरा धर्मवेत्तारो, विश्वावधिमुपासते ।
येन कर्मारिविध्वंसो, विहितो हितदायकः ॥२

यस्मै नमः परं मोक्ष-मार्गोपदेशिनेऽमितम् ।
यतो निःश्रेयसां सिद्धिः, सतां सर्वत्र सम्मता ॥३

यस्य वीर्यं विलोक्याऽऽत्मा, नूनं भवति वीर्यवान् ।
यस्मिन् सति शुभं किं नो, भवेद् भव्येषु निश्चितम् ? ॥४

स एव सम्पदां मूलं, कूलं भवोदधेः परम् ।
तमवाप्य विमूढः को, नो माद्यति महीतले ? ॥५

तेनैवाऽमा[१] विधेयः स्यात्, सङ्गो निःसङ्गतालयः ।
तस्मै क्रुध्यति किं कोऽपि, स्वप्नेऽपि हितवाञ्छितः ? ॥६

तस्माद् दूरं न संस्थेयं, क्षणं क्षणविधायिनः ।
तस्यैव शरणं ग्राह्यं, स्वात्मसम्पज्जिघृक्षुणा ॥७

तस्मिन् भगवति श्रेयः, प्रेयः स्याद्वादतः स्थितम् ।
अर्हन् ! मम मनोभूमौ, बीजीभूय भव स्थिरः ॥८

*********

## श्रीमहावीरस्वामि-स्तुतिगर्भं

# श्रीकदम्बगिरिस्तोत्रम्

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरिः

**महावीरस्वामिन्** ! क्रमकमलयुग्मे रमतु ते
द्विरेफश्चेतो मे मधुमधुरिमा लोलुपमनाः
ततः स्वादं स्वादं गुणगणपरागं गतमदं
क्रमाल्लीनो भूयादचलकमलाङ्के क्रमगते ॥१

अये मोह ! त्वं ते मनसि किमु जानासि ललना-
सहायो निःसङ्गं कलयसि भृशं मां प्रहरसि ।
इतो दूरं यायाः परिजनयुतः सत्वरमथो
कदम्बश्री**वीरो** हतविहतमारोऽन्ववति माम् ॥२

अहं भ्रामं भ्रामं निखिलभुवने भ्रामकमत-
भ्रमीभूतः कामं क्षणमपि विरामं न प्रगतः ।
कदम्बेशः प्राप्तस्त्रिभुवनसमाख्यातयशसं
समीक्ष्य श्री**वीरं** हतविहतपापः समभवम् ॥३

कदम्बासंसर्गादशिवनिचयं प्राप्य हृदये
मया सङ्गः कार्यो न हि परमतो निश्चितमिति ।
श्रुतं संसारेऽस्मिन् प्रभवति कदम्बादघहतिः
श्रितस्त्वां कादम्बाऽशिवहतिविलम्बं कुरु नहि ॥४

मया दृष्टः सर्वः सुरसमुदयः सत्त्वरहितः
परं स्वामिन् ! धीमन् ! त्वमसि विदितः सत्त्वसहितः ।
समुद्धर्तुं शक्तो भवगहनतः सम्प्रति जिनः
कदम्बाधीशस्त्वं हर भवभयं **सम्प्रति**जिनः ॥५

**नमीशं नेमीशं वृषभमथ सीमन्धर**जिनं
**महावीरं** धीरं जलनिधिगभीरं सुखकरम् ।
जिनानन्यान् सर्वान् गतसमयजं **सम्प्रति**प्रभुं
कदम्बे वन्देऽहं जिनपतिकदम्बं प्रतिदिनम् ॥६

**कदम्बा**ख्यः प्रख्यः प्रथमगणधरः **सम्प्रति**प्रभो-
र्वृतः सद्यः कोटिमुनिपरिवृतः सिद्धिललनाम् ।
यदीयाच्छच्छायाशरणवशतः कर्मदहनं
कदम्बं तं वन्दे प्रचुरमहिमानं शिवप्रदम् ॥७

अये ! लोकाः ! शोकग्रसितमनसः किं तत इतः
सुखं प्राप्तुं मिथ्याचरणमभिकुर्वन्त्यनुदिनम् ।
अमुं साक्षाद् वाञ्छासुरविटपिनं पूर्णमहिमं
कदम्बं सेवध्वं नतसुरकदम्बं गिरिवरम् ॥८

******

# श्रीसीमन्धरस्वामि-उपासना

- कल्याणकीर्तिविजयः

## चैत्यवन्दनम्

सीमन्धरेश ! तीर्थेश !, नष्टक्लेश ! जिनेश ! हे ।
वीतराग ! गतद्वेष ! , प्रसीद परमेश ! हे ।।१

श्रेयांसवंशगगना-ङ्गणोल्लासकरो रविः ।
सत्यकी जननीकुक्षि-मानसे राजहंसकः ।।२

स्वशौर्येण हतं येन, निःसीमं कर्मणो बलम् ।
सीमाधरं नु तदपि, **सीमन्धरं** नमाम्यहम् ।।३

-----------------

## स्तुतिः

तुङ्गे नगे जन्मनि मन्दराख्ये
ह्यमन्दरागैर्विबुधैः सशक्रैः ।
मन्दारमाल्यैः परिपूजितोऽसौ
**सीमन्धरेशो** विदधातु सौख्यम् ।।१

------------------

# श्रीसीमन्धरस्वामिस्तवनम्

(रागः बापलडां रे पातिकडां तमे)

श्रीसीमन्धर ! देवधुरन्धर !, विश्वम्भर ! करुणाकर ! रे ।
समताजलधर ! ज्ञानदिवाकर !, वन्दे शमरत्नाकर ! रे ॥१

त्वया विना शरणं न हि किमपि, संसारे सम्प्राप्तम् रे ।
त्वच्चरणाग्रे स्थानं देहि, करुणारसधाराधर ! रे ॥२

बहुभवसञ्चितपुण्यकोटिभिः, प्राप्तस्त्वच्छासनमिह रे ।
तव प्रसादात् प्रतिभवमेतत्, लभै प्रशमलक्ष्मीधर ! रे ॥३

क्षणे क्षणे मे हृदये राग-द्वेषक्लेशः प्रसरति रे ।
तं शमयतु समतां च प्रकटयतु, साम्यसुधारससागर ! रे ॥४

शुचिभिर्भावतरङ्गैरमलं, चित्तं मे सम्भवताद् रे ।
सत्तरङ्गसञ्चितकल्याणं, त्वत्कृपया सीमन्धर ! रे ॥५

*********

# श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम्

- वाचकश्रीसहजकीर्तिगणी

## सूर्यास्तसमयवर्णन-चारित्र-केवलज्ञानोत्पत्तिवर्णनात्मकः पञ्चदशः सर्गः

पार्श्वं वदन्ति विबुधाः परं वच-स्तीर्थं प्रवर्तय विभो ! शिवप्रदम् ।
दानं च वार्षिकमदात् ततो जिनो, भूमण्डलं सकलमस्तु सत्सुखम् ॥१॥

पौषाद्यपक्षभवमानसत्तिथौ, दीक्षां जिनः शममयीं ललौ स्वयम् ।
सिद्धान् प्रणम्य शिरसा महोदयं, देवेन्द्रचक्रविहितोत्तमोत्सवः ॥२॥

निःसङ्ग-निर्मम-निरामयो लयी, निर्दम्भकामरहितो निरञ्जनः ।
निर्मोह-लोभरमतापराङ्मुखो, भूमौ विहाररचनां चकार सः ॥३॥

सूर्योऽपरां दिशमुपैति काश्यपीं, कृत्वा मयूखविशदामनेकशः ।
मातुः स्थितिं शिशुरिवाऽऽशु दैवसीं, केलिं प्रमोदवशतो दिदृक्षया ॥४॥

सर्वा दिशः प्रमुदिता इवाऽरुणा, जाता बहिः प्रकटयन्ति रागताम् ।
लोके यतो रविरसावहर्निशं, तापं तनोति विनयी स्वमातृषु ॥५॥

वत्सा मिलन्ति सुरभीरसेच्छवः, स्थानं श्रयन्ति पथिकाः पतत्रिणः ।
नीडं च खेदमपहन्ति कर्षकाः, ध्वान्ता रसां मलिनयन्ति चाऽभितः ॥६॥

शिष्टा वृषं तदितरा अपुण्यकं, कुर्वन्ति कौशिककुलं द्रवप्रियम् ।
कोकश्च युग्मविरही न ही विधे-र्दुःखं प्रयासिहृदयं कठोरवत् ॥७॥

मर्त्या रमाश्च पशवो निशाचरा, जल्पन्ति शब्दमपटुं कटुस्वरम् ।
मन्येऽर्कसूनुरवनीं भयाकुलां, कुर्वन् प्रहासवशतोऽभिनृत्यति ॥८॥

एतादृशेऽस्तसमये विभावसोः, कर्मारिघातविहितोद्यमः प्रभुः ।
ध्यानाध्वरक्षितमनास्तपश्चयं, चक्रेऽभिभावितभवस्वरूपकः ॥९॥

मार्गं श्लिषन् जिनतनोस्तरोरिवाऽऽकर्षीत् करी करपुटेन चाऽऽनतिम् ।
सिंहस्तथैव न पुनः पराभवं सर्पस्तनोति परिवेष्टमङ्गके ॥१०॥

केकां मयूरनिवहोऽपरे वय-स्तिष्ठन्ति गात्रनिचये पृथक् पृथक् ।
तिर्यग्गणः शिशुरपि प्रभीच्युतो, हस्तं विलङ्घ्य रभसा स्म रोहति ॥११॥

केलेर्गृहं प्रभुरभूद वनौकसां, योगीन्द्रमूर्तिरपवर्गसाधकः ।
मोहक्षयं गुरुतमोऽष्टकर्मसु, प्राप प्रभुश्च भजते स्म केवलम् ॥ १२ ॥ललिताच्छन्दः॥

देवाः सर्वे समीयुस्तदनु जिनपतिं वीक्ष्य लब्धप्रमोदा-
चक्रुस्ते रीतिबद्धा रजत-कनक-सद्रत्नवप्रत्रयं च ।
स्वामी धर्मप्रपञ्चं स्ववचनरचनाविस्तरं संबभाषे
लोकाः सर्वेऽपि धर्मं यति-गृहिविभवं चाऽऽद्रियन्ते स्म सम्यक् ॥ १३॥

॥ इति **श्रीसहजकीर्ति**यतीन्द्रविरचिते **श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये **सूर्यास्तसमयवर्णन-चारित्रकेवलज्ञानोत्पत्ति**वर्णनात्मकः पञ्चदशः सर्गः ॥

*********

## सर्वज्ञगुणवर्णनात्मकः षोडशः सर्गः

प्रभो ! जय विश्वविदम्बुजकल्प !, विनिर्जितमोहमहीपतिजल्प ! ।
प्रमालय ! मालय ! धर्मधुरीण !, शमोदय ! मोदय तामसहीन ! ॥१॥

अनन्तचिदागमदागमदान्त !, विशाल ! कृपाल ! शिवाचलकान्त ! ।
निरीह ! निराश्रय ! संवरशुद्ध !, रसोज्झिततत्त्वरसैकविबुद्ध ! ॥२॥

अलक्ष ! सुलक्षण ! पापविपक्ष !, गमागमनाम ! विरामसपक्ष ! ।
जिताजितवादकुवादिविलक्ष !, नयानयभेदविभासनदक्ष ! ॥३॥

रसारसभावविशुद्धिविरक्त !, सदाऽभयदानरसायनसक्त ! ।
चलाचललोकविलोकनसार !, परापरशासनलब्धविचार ! ॥४॥

जरा-मर-रोगकठोरनिदाघ-निवारणदारुणशीतलमाघ ! ।
समासममार्गविचारनिषेक !, समीहितदानवितानविवेक ! ॥५॥

जगत्त्रयपावन ! धर्मनिदान !, निदाननिदानतपोत्थनिधान ! ।
कृपापरपापरताहितलोक !, भवार्णवतारक ! निर्गतशोक ! ॥६॥

त्वमीप्सितकामघटः प्रकटोऽत्र, करोषि सुखं जनता जिन ! यत्र ।
नमस्यति तत्र भवन्तमनन्तमनुत्तरमूर्तिधरं हि भदन्त ! ॥७॥

अतोऽथ जिनेश्वरतीर्थममुत्र, सुवृत्तमभीप्सितदं सुखमत्र ! ।
समेति जनप्रकरोऽत्र करोति, समुन्नतिमाशु नतिं वितनोति ॥८॥

यदिच्छति वस्तु जनः सुमतीश !, सुदृष्टमदृष्टमनन्तमधीश ! ।
त्वमेव तदेव ददासि विभासि, यशःप्रकरेण नतं किल पासि ॥९॥

इत्थं स्तुतः पार्श्वपतिः सुरेन्द्रै-
र्वप्रत्रयस्थो मुनिवृन्दयुक्तः ।
सद्भूतकैवल्यगुणैस्तनोतु
कल्याणमालां परितो विशालाम् ॥१०॥

॥ इति **श्रीसहजकीर्ति**यतीन्द्रविरचिते **श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये **सर्वज्ञगुणवर्णनात्मकः** षोडशः सर्गः ॥

*********

## सम्मेतशिखरवर्णन-वनवर्णन-सागरवर्णन-श्रीपार्श्वनिर्वाणगमनवर्णनात्मकः सप्तदशः सर्गः

भूमौ पार्श्वपतिविहारविधिना लोकान् प्रबोध्य स्वयं
वाग्भिर्विश्वपरोपकाररसिकः सम्मेतशैलाश्रमे ।
आयाति स्म मुनीन्द्रदैवतकृतासेवः परार्थप्रियो
वर्षाऽनेहसि कृष्णवारिद इव प्रह्लादयन् वृष्टिभिः ॥१॥ शार्दूलविक्रीडितम् ।

वृक्षा लसन्ति फल-पुष्पसमृद्धिमन्तः
सन्नागरा इव विचित्रविजातिभाजः ।

शुक्लप्रभूतसुशिलागृहपङ्क्तिवासाः
पत्रालिवस्त्ररचनापरिशोभमानाः ॥२॥ वसन्ततिलका।

व्रततिप्रमदा लसिताङ्गभराः, कलकूजितकोकिलभृत्यभृतः।
मृग-सिंह-गजादिपशुप्रलसत्-परिबर्हयुताः सरसा विरसाः ॥३॥ तोटकच्छन्दः।

सूर्यरश्मिदिवानोकुहान् सर्वतो, नागरानेव संवर्द्धयंस्तिष्ठति।
नीरसा नीरसाहारदानक्षयात्, केलिकर्मक्रियायोगसंपादनात् ॥४॥ स्रग्विणीच्छन्दः।

निशायां निशानाथतापः सुशीमो, नगान् नागरानेव वृद्धिं नयेच्च।
सुधावर्षणेन प्रतापापहाच्च, कलाकेलिसंवृद्धिहेतोऽस्तमोहा ॥ ५॥ भुजङ्गप्रयातम्।

भवति काननमदः प्रमोदभूः, पुरजनस्य शिखरी विशेषतः।
घनघनो भुवि यथैकतः, शुभो विशदवायुरपरः प्रशस्यते ॥६॥

उपत्यका गिरेर्वने न राजते, समन्ततः सुवर्णपञ्चकेन वै।
वशेव पञ्चवर्णशुद्धशाटिका, विराजितारुणाच्छगैरिकाञ्चिताः ॥७॥पञ्चचामरच्छन्दः।

गिरिमेनमभ्रममरावलीनतं, पयसा विशोध्य नितरां समर्चते।
पवनोऽपि शुष्कतृणकाष्टशोधनात्, किरणोऽपि नित्यमुदयाद्रिमागतः ॥८॥मञ्जुभाषिणीच्छन्दः।

चन्द्रो निशायां गगनस्थितोऽपि, ज्योत्स्नाभरेण प्रतिपूर्णमूर्तिः।
कर्पूरकल्पेन करप्रचार-रीत्येव संपूजयते गिरीन्द्रम् ॥९॥ इन्द्रवज्राच्छन्दः।

गिरिं जलं निर्झरपूरकूटान्, निषेवते स्वीयजडत्वहानिम्।
चिकीर्षु सच्चामरपङ्क्तिमच्छा-मधः पतद् वा वितनोति सम्यक् ॥१०॥ उपेन्द्रवज्राच्छन्दः।

विभावसुर्यं भजते सुतेजाः, धूप-प्रदीपादिविधौ पटिष्ठः।
रक्ष्या जलान्मे किल दाहशक्ति-स्त्वयेति विज्ञप्तिपरो बिभीपुः ॥११॥ उपजातिच्छन्दः।

यत्र पूतनिधयः पदे पदे, भान्ति कान्तरुचयो निधीश्वरः।
ढौकनं परिनिधाय सेवते, यं गिरिं निधनहानिहेतवे ॥१२॥ रथोद्धताच्छन्दः॥

सिद्धगणो गृहभव्यगवाक्ष-श्रेणिसदृक्षगुहासु विलासी।
क्रीडति हस्तगृहीतविपञ्चि-र्गायति यत्र च गीतकुलानि ॥१३॥ दोधकच्छन्दः।

अधित्यका यत्र सुपीठभक्तिभि-र्विराजतेऽत्यन्तसमासु रत्नभूः ।
लसन्ति दिव्याभरणामराङ्गनाः, परस्परं प्रीतिरसायनप्रियाः ॥१४॥ वंशस्थच्छन्दः ।

जैनेन्द्रचैत्यरचना मनोरमा, घण्टारवप्रथितकीर्तिमण्डलाः ।
बिम्बावली रविकरप्रसङ्गतो, यस्यां विभाति सुमनोमनःप्रियाः ॥१५॥ ललिताच्छन्दः ।

नगात् सरितः प्रभवन्ति यतो-ऽच्छतरा जलराशिपतिं विभजन्ति ।
रसाधिकमात्मभवं सफलं च, नयन्ति सुनायकमभ्यमुपेत्य ॥१६॥ मौक्तिकदामच्छन्दः ।

तदनु निजवशानां भोगयोगं प्रपद्य
स्वरसमधिकमच्छं फेनकूटाद् विमुञ्चन् ।
बहिरिति वदति स्म प्राणभाजां हि गर्जन्
सुकृतफलमदो मे संपदः पश्यताच्छाः ॥१७॥ मालिनीच्छन्दः ।

नगाः सर्वे येऽमी भुवनविदिताः पुण्यनिधयो
हिमप्रस्थाद्यास्ते मम सुरसरिन्मुख्यसरितः ।
कलत्रत्वेनैता विदितगुणराशेर्धृतिमतः
प्रमुञ्चन्ति प्रीताः प्रतिदिनमलं ढौकनमिव ॥१८॥ शिखरिणीच्छन्दः ।

रत्नस्तोमः प्रमितिरहितो वाञ्छितार्थप्रदाता
पुत्रश्चन्द्रो ग्रहपतिरयं राजते सुप्रकाशः ।
कृष्णः शेते स्थितिमुपगतो मे शरण्यस्य जीवा
मत्साया ये सलिलरतयः प्रीतिभाजो रमन्ते ॥१९॥ मन्दाक्रान्ताच्छन्दः ।

अम्भःश्रेणि मदीयां प्रमुदितमनसो धूमयोनिप्रपञ्चा
लायं लायं यथेच्छं समुदयधरणीपीठमुज्जीवयन्ति ।
वृक्षाः सर्वे फलन्ति प्रसृमरविभवा नालिकेरादयो ये
मामङ्गीकृत्य नित्यं विमलतरयशो गीयते भो ! ममेति ॥२०॥ स्रग्धराच्छन्दः॥
। चतुर्भिः कलापकम् ।

अतः परमहीनराड् मुनियुतो गिरिं प्राप्तवान्
विहाय सुरपूजितो वनमदो जनालङ्कृतम् ।
विधूय समतावशान्निखिलकर्मकारागृहं
बमूव भगवांस्तदा सकलदुःखविध्वंसनः ॥२१॥ पृथ्वीच्छन्दः ।

जिन-शिववशा चिद्रूपं त्वां शरीरविवर्जितं
विमलमरसं शान्तास्वादं कृतापररक्षणम् ।
सरसनभसः शुक्लाष्टम्यां तिथौ रमणं व्यधा-
दचलमरुजं सिद्धं बुद्धं भयस्मयविच्युतम् ॥२२॥ हरिणीच्छन्दः ।

विगतवर्णमवर्णसवर्णता-सममनल्पविकल्पविकर्त्तनम् ।
अहितमाहितमीक्ष्यमनीक्षितं, प्रशमभावितसिद्धमहं भजे ॥२३॥ द्रुतविलम्बितच्छन्दः ।

इति **श्रीसहजकीर्तियतीन्द्रविरचिते** **श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये **सम्मेतशिखरवर्णन-वनवर्णन-सागरवर्णन-श्रीपार्श्वनाथनिर्वाणगमन**वर्णनात्मकः सप्तदशः सर्गः ॥

*****

## शासनसम्राजां
## पूज्याचार्यभगवतां
# श्रीविजयनेमिसूरीश्वराणां
## स्तुत्यष्टकम्

- मुनिः वाचस्पतिविजयः

मूर्तिर्यस्य निसर्गतोऽपि रुचिरा सद्ब्रह्मचर्याश्रिता
कीर्तिश्चाऽपि दिगन्तराङ्गणगता पूर्णेन्दुप्रस्पर्धिनी।
तीर्थोद्धारविधानतोऽभिनुतधीर्भूपालबोधीमना
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥१

शान्तो यःप्रकृतौ कृतौ पटुतरः कान्तः सदा चाऽऽकृतौ
प्रान्तः सन्मतिसागरस्य सततं श्रान्तो न बोधार्णवे।
शक्तो दुर्मतिवादिदर्पदलने रक्तश्च जैनागमे
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥२

सौजन्याम्बुनिधिर्विधिर्विधिवतां विद्यानिधिश्चाऽर्थिनां
वाग्मी वस्तुविवेकनिर्णयसुधीः स्याद्वादसिद्धान्तिनाम्।
सिद्धिः साधकसंहतेर्हितवहो मानो मनीषाभृतां
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥३

रागद्वेषमहासपत्नतिमिरप्रध्वंसमार्तण्डकः
सम्यग्ज्ञान-चरित्रताकुमुदिनीराकाशशी हृद्वशी
साकूतस्मितशर्मसम्भृतवचः सर्वोपकारव्रती
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥४

श्रीमत्केवलवद्विवेकविसृतिप्राप्तिप्रमोदाकरः
कारुण्यामृतसागरानवरतध्यानावदातेक्षणः ।
शान्तिस्तोत्रमहानिधिः प्रतिनिधिः स्याद्वादसिद्धान्तिनां
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥५

अर्हद्वक्त्रविनिःसृतं द्वयविधं धर्मं बरीभर्ति यो
बाढं विश्वजनस्य चाऽत्र सुकृतं कृत्यं चरीकर्ति च ।
गाढं स्वीयगिरा स्वशिष्यहृदयध्वान्तं जरीहर्ति यो
भव्याम्भोजदिवाकरो विजयते **श्रीनेमिसूरीश्वरः** ॥६

येषां **दर्शन**तः सदा जनगणैः पुण्यो**दयः** प्राप्यते
नित्या**नन्दन**दो मुदाऽऽननवरो **विज्ञान-पद्मा**लयः ।
सज्ज्ञाना**मृत**सिञ्चनेऽस्त्यविरतो **लावण्य**लीलालयः
**कस्तूरा**दियुताष्टसिद्धिसहितः **श्रीनेमिसूरीश्वर**ः ॥७

इत्येवं रचिता सिता सुखचिता स्तुत्या स्तुतिर्नन्दिनी
सत्काव्यामृतस्यन्दिनी गुणगणानेकार्थस्रोतस्विनी ।
विज्ञानामृतवर्षिणी भवहरी माङ्गल्यनिःस्यन्दिनी
भूयाल्लोकविलोकमात्रसुखदा काङ्क्षेन्नु **वाचस्पतिः** ॥८

*********

साहित्यसम्राजां

पूज्याचार्यभगवतां

# श्रीविजयलावण्यसूरीश्वराणां

## स्तुत्यष्टकम्

- मुनिः वाचस्पतिविजयः

श्रुत्वा यस्य वचःसुधां शममयीं किं श्रूयते चाऽपरं ?
गात्वा यस्य गुणावलिं शिवकरीं किं गीयते चाऽपरम् ? ।
नत्वा यस्य पदाम्बुजं दुरितहं किं नम्यतेऽन्यक्रमौ ?
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ॥१

पीत्वा यस्य वचःसुधां जिनमते श्रद्धा वरीवृध्यते
यस्य ह्यागमतत्त्वपूर्णमतुलं ज्ञानं दरीदृश्यते ।
चित्ते यस्य च प्राणिमात्रविषये मैत्री वरीवृत्यते
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ॥२

आबाल्यादनु शीलशालिमुनितामासाद्य भाग्योदयाद्
गुर्वादिष्टविशिष्टभक्तिहृदयाद् वन्द्याभिवन्द्योऽभवत् ।
शास्त्राभ्यासविधानसाधकतया प्राचार्यतां योऽगमत्
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ॥३

चञ्चच्चित्तचकोरचन्द्रसदृशं चाञ्चल्यभावापहं
चातुर्यैकचयं च चित्रचरितं चारित्र्यचीर्णं सना ।
चित्तेऽचिन्त्यविचारचारचरमं चिन्तामणिं चिन्तने
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ॥४

चर्चायां खलु वृत्ति-चूर्णिविषये चाचर्च्यते यैः सदा
चातुर्येण चटूक्तिचित्तहरणे चेकीर्यते चिन्तना ।
चित्राचारविचारचारुचरणे यैश्वर्यते सर्वदा
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ।।५

बाल्ये व्याकरणादिशास्त्रविषये कौशल्यमासादितं
येनाऽष्टाधिकलक्षमानकलितं साहित्यमानिर्मितम् ।
यद्वक्त्राम्बुजके मुदा निवसति स्तुत्या सदा शारदा
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ।।६

यन्नामश्रवणाद् वितर्ककलिता दूरङ्गतास्तार्किकाः
साहित्येऽपि निविष्टशिष्टमतिकं ज्ञात्वा च ते वै गताः ।
शक्तिं व्याकरणादिशास्त्रविषये श्रुत्वा गताः शाब्दिकाः
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ।।७

हैमव्याकरणादिशास्त्रविषया यान् यान् पुराऽध्यापिताः
तैः सर्वैरपि साम्प्रतं क्षितितले पाण्डित्यमासादितम् ।
येनाऽपाठि च शैशवेऽहमनिशं वाचस्पतिश्चाऽऽदरात्
तं श्रीसंस्कृतवाग्विलासकुशलं **लावण्यसूरिं** स्तुवे ।।८

*********

# पुष्पसौरभम्

- डॉ. गदाधरः त्रिपाठी

तथा पुष्पेषु व्याप्तं हि, सौरभं केसरयुतम् ।
यथा प्राणिषु प्राणा हि, तदेव ननु जीवनम् ॥

लतानां चैव वृक्षाणां, स्त्रीणां शृङ्गारसाधकम् ।
रजोयुक्तं तथा चैवाऽस्त्याह्लादकारकं नु वै ॥

प्रकृत्या यच्च प्राप्तं हि, पुष्पमाह्लादकं परम् ।
कोमलं परमं चैव, पुष्पति कुन्दकोरकम् ॥

देवानां नु प्रियं चैवाऽर्पयन्ति साधका सदा ।
प्राप्नुवन्ति हरेर्धाम, शास्त्राणां प्रतिपादनम् ॥

मन्दारैः कुन्दपुष्पैश्च, मालतीभिस्तथा च वै ।
करवीरैः पलाशैर्नु, देवीनां पूजनं सदा ॥

पूजाकाले तथा चैव, विविधेषूत्सवेषु च ।
संस्कारसमये चाऽपि, पुष्पगन्धिर्विराजते ॥

श्वेतपुष्पैश्च यः कोऽपि, प्रभोः पूजां करोति नु ।
याति वै स परं लोक-मृषीणां प्रतिपादनम् ॥

विविधैः पुष्पगन्धैर्हि, वायुः संशोधितः यदा ।
ददात्याह्लादमत्यन्तं, पवित्रं घ्राणतर्पणम् ॥

*********

# १.
# बद्धश्रमिकोऽहम्

- प्रा. अभिराज-राजेन्द्र-मिश्रः

मातापितरौ मे दिवङ्गतौ
भगिना सा ज्येष्ठा परिणीता।
जातोऽसमये हाऽनाथोऽहं
न च कथा जनन्या मुखाच्छ्रुता।

धनपशुना हन्त पितृव्येन
कस्मैचित् सहसा दत्तोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम्॥१

अत्यन्तनृशंसो मत्स्वामी
रात्रौ प्रबोधयत्याक्रोशैः।
जाते क्षणमात्रविलम्बेऽपि
दण्डेन ताडयति सह रोषैः।

को मामसहायं रक्षेदिह
सर्वं नु सहे, गर्दभकोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम्॥२

सा ग्रामवयस्यानां क्रीडा
तत् साधुजनन्या वात्सल्यम्।

सा ज्येष्ठभगिन्या अङ्कसुखम्
स्वप्नीभूतं तद् गृहसौख्यम् ।

उपरते पितरि वृद्धो जातः
बुद्बुदो जलस्य क्षणिकोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम् ॥३

यावन्नु निशीथं योजयते
कर्मणि यस्मिन् कस्मिन् स्वामी ।
किं भक्षयामि स्वपिमि कियत् ?
स्वयमेव न जाने परिणामी ।

गृह्णाति कियत् क्रयमूल्यं मे
पितृव्यो यद्भ्रातृव्योऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम् ॥४

मामप्युद्धर हे परमेश्वर !
द्वादशवर्षीयशिलीन्ध्रोऽहम् ।
कामं पितृव्यसुतो नाऽहं
मृतमातुस्तथाऽपि चन्द्रोऽहम् ।

पठितुं ममाऽपि कामना प्रभो !
यत्कृते नियत्या जनितोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम् ॥५

लोचनयोः शुष्को मेऽश्रुचयः
लुप्तोऽधरयोश्च तरलहासः ।
लुण्टितं मदीयं स्वातन्त्र्यं
यत्प्रभृति निर्मितोऽहं दासः ।

क्रीडन्ति पितृव्यसुता गेहे
दण्डकवनवासी कृमिकोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम् ॥६

हे प्रभो ! कमपि बालं राष्ट्रे
पितृसौख्यवञ्चितं मोत्पादय ।
पितृमरणात् प्राक् **मारय तमेव**
जीवन्तं मा पशुवत् पीडय ।

करुणावरुणालय-दीनबन्धु-
पदवीं रक्षय पदविनतोऽहम् ।
शैशवेऽपि बद्धश्रमिकोऽहम् ॥७

दीयते भुशुण्डी चेद्धस्ते
किं राष्ट्ररक्षको नो भविता ?
दीयते लेखनी चेद्धस्ते
किं कविर्लेखको ना भविता ?

जीवनं मदीयं स्वाधीनं
स्यादितिमात्रे न्वभलषितोऽहम्
शैशवेऽपि बद्धश्रमिकोऽहम् ॥८

*********

# २.
# शेषं मन्ये पाखण्डम्

- प्रा. अभिराज-राजेन्द्र-मिश्रः

नाम ममाऽस्ति रामदीनः
अहं राष्ट्रभक्तो भविता ॥

मम नामाऽस्ति सरोजकुमारी
अहं सत्यभाषणे रता ॥

नाम्नाऽहमस्मि सलमानः
सर्वधर्म-धृतरागोऽहम् ॥

मम नामाऽस्ति हरिरामः
ध्रुवं पिपासुतडागोऽहम् ॥

अहं सोफिया **ख्रिस्त**परा
**हिन्दुत्वे**ऽप्यनुरक्ताऽहम् ॥

अहं हसीना **मुहम्मदा**
किन्तु **हिन्दु**परिणीताऽहम् ॥

देवालये मम प्रीतिः
**मन्दिरमथो गुरुद्वारम्** ॥

तीर्थे तीर्थे मम निष्ठा
**अजमेरं** स्याद् **हरिद्वारम्** ॥

**वेदो** भवेत् **पुराणं** वा
**बाइबलं** नु **कुरानम्** ॥

**जपुणी सुखमनी**ग्रन्थो वा
**धम्मपदो निर्ग्रन्थो** वा ॥

जीवमीश्वरं संसारं
त्रयमिदमेव सृष्टिसारम् ॥

ज्ञातुमिदं प्रयते नित्यम्
शेषं मन्ये **पाखण्डम्** ॥

*********

# ३.
# तद् व्युपदिशामि

- प्रा. अभिराज-राजेन्द्र-मिश्रः

युष्मत्तो न किमपि गोपायामि
भवने यददिम तदहं वदामि ।।
भिन्नेऽहन्युष्णजलं पीत्वा
शौचादिकर्म विधिना कृत्वा
एला-लवङ्ग-मरिचादियुतं
निम्बुकचायं चषके निपीय
व्यायामं होरावधि कृत्वा
स्नानं शीतलपयसाऽऽचरामि ।।१
रोचते नु माषद्विदलं मे
[१]वज्रान्नरोटिकामहं वृणे
सर्षपतैले भर्जितशाकं
[२]परवलाऽलाबु-कुन्दुरुं पणे
तक्रं सलवण-जीरकचूर्णं
भक्ष्यानन्तरमनिशं पिबामि ।।२
रुचिरस्ति सयूषे पनसे मे
यदि लोहकटाह्यां पच्येत

रोचते कचालुर्भूकन्दः
समुचितं क्वथित्वा भृज्येत
गुड-घृतयुक्तां रोटीमेकां
रात्रौ नूनं किल भक्षयामि ।३
चणकं धानां लाजां भुट्टां
भर्जितमन्नं यत्किमपि चाऽपि
चर्वामि सावलेहं नित्यं
सलशुन-तक्रं गुडं चाऽपि
खादाम्यथ पाचनपथ्यकरं
न तमाखुचूर्णमास्ये दधामि ।।४
सम्प्रति शैशवं गतप्रायं
यच्चाऽऽसीज्जननीसुरक्षितम्
क्षुत्क्षामोऽद्याऽपि प्रसूदत्तं
मात्रायां भोजनमाहरामि
नीरोगं तेन दधे स्वास्थ्यं
स्वजनेभ्योऽप्यथ तद् व्युपदिशामि ।।५

*********

# हाइकु-काव्यानि

- मुनिः शीलचन्द्रविजयः
**(डहेलावाला समुदायसत्कः)**

प्रभुस्मरणम्
भवति शैत्यप्रदम्
कुर्वन्तु सर्वदा ॥

एकान्त-स्थलम्
हाइकु-रचनायै
अस्ति कारणम् ॥

कुरु साधनाम्
तर भवसागरम्
वर निर्वाणम् ॥

भगवत्प्राप्तिः
विना भक्तियोगम्
भवेत् रे कथम् ?

महती शान्तिः
परभावत्यागेन
श्रमः कर्तव्यः ॥

कथा-श्रवणम्
प्रसन्नता-प्राप्त्यर्थम्
महाभैषजम् ॥

अस्त्यन्धकारः
भवन्तं विनैवाऽद्य
मम मानसे ॥

यस्मिन् न मोहः
विद्यते कदाऽपि नु
नमो मे तस्मै ॥

बह्वस्ति भोज्यम्
न दृश्यन्ते भोक्तारः
क्षुदभावः स्यात् ॥

स्वदोषदृष्टिः
मोक्षमार्ग-प्रापणे
अनुकूलैव ॥

वचनघाती
ननु विश्वासघाती
तद्दूरता वरा ॥

तस्य स्मरणे
जायते खल्वानन्दः
न ज्ञातः कथम् ?

परीक्षादानम्
विना हि परिश्रमम्
सुखकारि न ॥

*****

# संस्कृतभाषया लिखितं
# श्लोकमयं
# पत्रम्

- पं. चन्द्रशेखर-झा

स्वस्ति,

रसभावचारुदेहा, कविताकान्ता विहाय मानं यम् ।
लीलाविलासकुशलं, रमयति तस्मै नमः कस्मै ।।

मोदितमामकचित्तं, वृत्तं वृत्तं व्यजिज्ञपत् पत्रम् ।
भावत्कं मामुत्कं, भवति; गतिश्चित्रमस्यैवम् ।।

जतुलं तत्पाथेयं, पान्थस्य पथः प्रथीयसः पथ्यम् ।
त्वद्विरहस्य ममाऽतो गन्ताऽक्लेशेन गन्तव्यम् ।।

चातकपोताद् भेदो, वारिदमित्रैकतानभावेऽपि ।
चलदलकृते कदाचिद्, रटनं तस्याऽनिशं ममकम् ।।

एतन्मात्रं हृदयेऽवश्यं सदये प्रदेयमित्याशा ।
आशान्तावासस्य, प्रपूरणीयाऽप्यणुर्धीमन् ! ।।

स्तोतव्यः स **हरिर्यो**, मित्राक्ष्यब्जप्रकाशसत्कारुः ।
राकायामपि वार्त्तो, ब्रह्माऽपूर्वो यतो जातः ।।

कृष्णानन्दः कुशली, कुशलोऽनलसः सलालसो भवति ।
स स्मरति न यो **जगदीशं,** कोऽसौ निजहितकृतं समतिः ।।

दास्यति पत्रं प्रायः, कवितोपेतं प्रवृत्तिपिशुनं ते ।
न सखे ! सुजनो मुह्यति, विनयं गच्छति पदोपेतः ।।

वीरमगाममगामह-मतुलालापैः सुखं समाहूतः ।
गतपक्षतिगतसङ्गः, समयाकरवं दिनैकमहो ! ।।

सत्साचिव्ये विहिते, भवता नादाह्वयं पदव्यापः ।
कृपणो जनोऽथवैवं, लब्धावसरं दुरुपयुङ्क्ते ॥

ज्ञानलवदुर्विदग्धः, पण्डितमानी विशेषकोऽनक्षः ।
अवकाशोऽनवकाशो, होराष्टककार्यकालोऽन्यः ॥

नाऽपि व्यवस्थितिरीषद्, विशदमतीनां स्वभावतो नित्या ।
एकोऽप्यनर्थकुशलः. सङ्घीभूतस्य किं वाच्यम् ? ॥

उत्प्रेक्षे तदिहाऽहं, सम्भवति मम स्वमानसारस्य ।
नो चिरवासरवासः, पल्वलसलिले मरालस्य ॥

अचिरादेवेतोऽतः, पदपरिवर्तनमनोरथः खिन्नः ।
अमदावादनगर्यां, गन्ता सर्वैर्विचारार्थम् ॥

नेदं सुजननिवासोचितं पदं तच्चिराद् विजानेऽहम् ।
सत्यं चिरसहवासात्, परपदमर्मज्ञता सुधियाम् ॥

वेत्ति न विधेर्विधित्सित-मिह कोऽपि फलानुमेयता हेतोः ।
निश्चितवृत्तं परके, निवेदयिष्याम्यतः परके ॥

लिखितस्तावकपत्रे, ज्ञातो ध्यातो मुहुर्मुहुः प्रसभम् ।
स्वप्रान्तीयोदन्तो, दुनोति मत्स्वान्तमत्यन्तम् ॥

नाऽऽगाद् ग्रामाद् पत्रं, तस्मान्न लिखामि किञ्चिदत्र सखे !
अथवा यद्भवितव्यं, कस्तत् परिवर्त्तयितुमीशः ॥

मुनयः सन्तु समे मे, शमिनः सञ्ज्ञाः परोपकृतिकुशलाः ।
सततं मयि च दयन्तां, सदयाः श्रीमन्नियोगेन ॥

भाईशङ्करशर्मा, मत्कुशलज्ञो भवेच्च भवदास्यात् ।
विस्मृतदेवीसूक्तं, निवेदयिष्यामि कालेऽग्रे ॥

अथ करकमलन्यस्तामन्दमरन्दवर्णवृन्दचणं ते ।
दलमिन्दिन्दिरमिच्छन्, **चन्द्रादिशेखरो** विरतः ॥

(**पं.जगदीश-झा**महोदयं प्रति पत्रमिदम्)

(21-8-1950 - दिनाङ्कितम्)

*********

# मयूरदूतम् (खण्डकाव्यम्)

## (स्वोपज्ञपञ्जिकावृत्तिसमेतम्)

**- स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः**

(शिखरिणीच्छन्दः)

**चिरं सर्वे पट्टाम्बरपरिदधानाः सुकृतिनो,**
**महार्घ्यैर्नेपथ्यैस्समधिकमनोज्ञैरवयवैः ॥**
**वयोभिर्भोगार्हैर्विजितविबुधा नागरजना**
**स्तथाऽप्युत्तिष्ठन्ते भृशमिह तपःकर्मणि मुहुः ॥९३॥**

(९३ वि०) नागरिकजनानां तपोरुचिवर्णनम् । **पट्टाम्बरेति** – क्षौमवस्त्रं धारयन्तः । **महार्घ्यैः** - बहुमूल्यार्हैः, अर्घ्यते पण्यमस्मिन् इति अर्घः, *स्थार्ति* ( उणादि० १०९) इति घः, अर्घति पण्यमत्रेति वा, महाँश्चाऽसौ अर्घः, महार्घः :- महामूल्यं, तद्योग्यं महार्घ्यं, तैः । **नेपथ्यैः** – वेषैः, नेत्रयोः पथ्यं – नेपथ्यं, पृषोदरादित्वात् साधु, *वेषो नेपथ्यमाकल्पः* ।३।२९९। इत्यभिधानचिन्ता० । **उत्तिष्ठन्ते** - सज्जीभवन्ति, *उदोऽनूर्ध्वेहे०* ।३।३।६२ इत्यात्मनेपदम् । तपस्यार्थं चेष्टन्ते इति यावत् ॥९३॥

**पुरेऽस्मिन् पुण्याढ्ये करिषु मदविभ्रान्तिरसकृद्,**
**गुणच्छेदश्चापे शशिनि चिकुरे वा कुटिलता ॥**
**ध्वजे कम्पः शास्त्रे व्यसनमथ बन्धः कविकृतौ,**
**भयं पापादास्ते शिखरिणि विपक्षत्वमनिशम् ॥९४॥**

(९४ वि०) परिसङ्ख्यया नगरसद्गुणवर्णनम् । **करिषु** – हस्तिषु, करोति किरत्यनेन वा करः – शुण्डा, सोऽस्त्यस्येति करी – हस्ती, तेषु । **असकृत्** – वारंवारम्, एको वारोऽस्य इति सकृत्, *एकात् सकृच्चास्य* ।७।२।|१११। इति सिद्धं, न सकृत् – असकृत्, पुनःपुनरिति यावत् । **चापे** – धनुषि, चपो – वेणुस्तस्य विकारश्चापः, तस्मिन् । **चिकुरे** – केशे, चक्यते – प्रतिहन्यते इति चिकुरः, *श्वशुर०* (उणादि० ४२६) इति उरान्तो निपातितः, जातावेकत्वम् । **शिखरिणि** – पर्वते | **विपक्षत्वं** – पक्षराहित्यं, परिसङ्ख्यया नगरपक्षे श्लेषेण शत्रुताराहित्यमवसीयते । **अनिशम्** – अविरतं, निशा – विरतिस्थानं नाऽस्त्यत्र – अनिशम् । परिसङ्ख्यालङ्कारः ॥९४॥

**जिनेन्द्राणां प्रेक्ष्य प्रचुरतरचैत्यानि नगरे,**
**मुदे जैनानां किं विमलगिरिशृङ्गं सुरपतिः ।।**
**समानीय न्यास्थत् सुकृतभवनेऽस्मिन् पुरवरे,**
**न चैवं संभ्रान्तिर्भवति सहसा कस्य हृदये ? ।।९५।।**
**महोत्तुङ्गं चैत्यं कनकगिरिवत्तत्र नितरां,**
**घनश्यामः कामं जनकचकलापो जलदति ।।**
**प्रभोश्चैत्ये स्वर्णासमकलशकान्तिस्तडितति,**
**तदेतत् प्रेक्ष्य त्वं निरुपममुदं प्राप्स्यसि चिरम् ।।९६।।**
**रजन्यां यत्राऽयं रजतगिरिधौताश्मभवने,**
**प्रविश्याऽन्तश्चन्द्रः पुनरपि किमु क्षीरजलधेः ।।**
**प्रविष्टोऽहं गर्भं क्षणमिति भयभ्रान्तहृदयः,**
**परिम्लानः प्रातः कथमपि सरत्यम्बुधितटम् ।।९७।।**
**भृशं भव्यं नव्यं जिनपभवनं रायसिकृतं,**
**द्विपञ्चाशच्चैत्यैरधिकरमणैर्मण्डिततरम् ।।**
**महीयान् यत्केतुः पवनविधुतः पापनिचयं,**
**बहोर्दूरान्मन्ये क्षिपति सततं मन्युवशतः ।।९८।।**
**इहत्ये प्रासादेऽमलमणिकदम्बो विनिहितः,**
**क्वचिच्चित्रं रम्यं रुचिररुचकाचो विलसति ।।**
**तथा द्वारे द्वारे कनकमणिमुक्तादिखचितः,**
**कपाटद्वन्द्वः सन्मलयजमहादारुरचितः ।।९९।।**
**इदं नीरं रम्यं रजतमयपात्रेऽतिविशदे,**
**तथा हैमे कुम्भे शुचिसुरभिपञ्चामृतरसः ।।**
**सुमं शस्तं स्निग्धं घुसृणललितं चन्दनमदः,**
**प्रभोश्चैत्यं प्रातर्ध्वनिरिति सदा जायत इह ।।१००।।**

(९५-१०० वि०) जामनगरस्थप्रेक्षणीयार्हच्चैत्यवर्णनम् । **किम्** – उत्प्रेक्षाव्यञ्जकमव्ययम् । **विमलगिरिशृङ्गं** – श्रीशत्रुञ्जयाद्रिशिखरम् । **सहसा** – अकस्मात्, तत्क्षणमितियावत् । **घन-श्यामः** – घनः – मेघस्तदिव श्यामः – कृष्णः । **जनकचकलापः** – मनुजकेशभारः । **जलदति** – मेघवदाचरति, *कर्तुः क्विप्०* ।३।४।२५। इत्याचारार्थे क्विप् । **स्वर्णासमेति** – सुवर्णानुपमकुम्भप्रभा, **तडितति**

– विद्युदिवाऽऽचरति, पूर्ववत् क्विप्, उभयत्राऽऽचारार्थे क्विबन्तत्वाद् धातुत्वम् । **रजतगिरीति** – रजतगिरिः – हिमवान् पर्वतः, कैलास इतियावत्, तद्वत् **धौतं** – धवलितं, निर्मलमिति-यावत्, **अश्म** – पाषाणः, तस्य भवनम्, तद्विरचितभवनं – मन्दिरं, तस्मिन् । **गर्भे** – मध्ये । **महीयान्** – अतिशयेन महान् । **यत्केतुः** – यस्य मन्दिरस्य पताका, चैत्यशिखरस्थितध्वज इतियावत् । **पवनविधुतः** – वायुकम्पितः । **मन्युवशतः** – क्रोधवशात्, मन्यते इति मन्युः, *यजि-शुन्धि०* (उणादि० ८०१) इति युः, **रुचिररुचकाचः** – रुचिरा – मनोज्ञा, रुचा – कान्तिर्यस्य स चाऽसौ काचः - क्षारः, **कपाटद्वन्द्वः** – अररपुटयुगं, कम्पते – कपाटः, *कपाट-विराट०* (उणादि० १४८) इत्याटे निपातितः । **सन्मलयजेति** – सच्चन्दनबृहत्काष्ठनिर्मितः, **नीरं** – जलम्, नीयते नयति वा इति नीरम्, *ऋज्यजि०* (उणादि० ३८८) इति किद् रः, **सुमं** – पुष्पं, सुष्ठु माति – सुमं, सूते फलमिति वा सुमं – *रुक्मग्रीष्म०* (उणादि० ३४६) इति मे निपात्यते । *उत्प्रेक्षा-लुप्तोपमा-रूपकानुप्रास-स्वभावोक्तिप्रमुखालङ्काराः* ॥९५-१००॥

**सदा शान्तिं यच्छन् जनसमुदये षोडशजिनः,**
**प्रवृद्धान् रागादीनपि परिहरन् मङ्गलकरः ॥**
**जगज्जन्तूद्धारोद्धतचरितविख्यातमहिमा,**
**महेन्द्राद्यैर्देवैर्महितचरणो राजतितराम् ॥१०१॥**

(१०१ वि०) तत्रस्थश्रीशान्तिनाथप्रभोर्माहात्म्यवर्णनम् । **यच्छन्** – ददत्, यम् *शतृ*, *गमिषद्यमश्छ०* ।४।२।१०६। इति छः । **षोडशजिनः** – षडुत्तरा दश षोडश, *एकादश षोडश०* ।३।२।९१। इति ष-उत्वं दस्य ढत्वं च निपात्यते, षोडशानां पूरणः षोडशः, *सङ्ख्या पूरणे* डट्० ।७।१।१५५। इति पूरणार्थे डट्, स चाऽसौ जिनस्तीर्थकरः – षोडशजिनः श्रीशान्तिनाथप्रभुः, **जगदिति** – सांसारिक-प्राणिपरित्राणप्रकृष्टाचरणप्रख्यातप्रभावः । **महितचरणः** – पूजितपादः ॥१०१॥

**क्वचित्फुल्लं पङ्केरुहमिह तडागं खगयुतं,**
**शुकं क्रौञ्चं चाषं प्रमदकरियुग्मं हयवरम् ॥**
**सटाशुभ्रं सिंहं चटुलमभिरामं मृगशिशुं,**
**परिन्यास्थत् पीठे चतुरतरकाका प्रभुगृहे ॥१०२॥**

(१०२ वि०) कारुविरचितजिनचैत्यस्थचित्रकलादिवर्णनम् । **फुल्लं** – विकसितं, **पङ्केरुहं** – कमलम्, *अद्व्यञ्जनात् सप्तम्या बहुलम्* ।३।२।१८। इतिसप्तम्या अलुक् संज्ञायाम् । **खगयुतं** - पक्षिपरिकलितं, **क्रौञ्चं** – पक्षिविशेषं, क्रुङ्ङेव क्रौञ्चः प्रज्ञादित्वाद् *अण्* स्वार्थे, **चाषं** – किकीदिविनामपक्षिविशेषं, **प्रमदेति** – मदमत्तमतङ्गजद्वयं, **हयवरम्** – अश्वश्रेष्ठं, **सटाशुभ्रं** –

जटादीप्रं, **सिंहं** – केसरिणं, हिनस्तीति सिंहः, *हिंसेः सिम् च* (उणादि० ५८८) इति *हः*, हिंसेः सिमादेशश्च, यद्वा हिंस्-धातोः *अच्*-प्रत्यये पृषोदरादित्वात् साधुं, तदुक्तं –

भवेद्वर्णागमाद्धंसः, सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृते-वर्णनाशात्पृषोदरः ॥१॥

**चटुलं** – चञ्चलम्, **अभिरामं** – मनोरमम्, अभिरमते मनोऽत्रेति अभिरामं, **चतुरतरकारुः** – अतिनिपुणशिल्पी ॥१०२॥

**बहिः सूक्ष्मच्छिद्रैरतिरुचिरवातायनमिह,**
**द्वये पार्श्वे चञ्चच्छिखियुगलमेकान्तसुभगम् ॥**
**पुरः पाञ्चाली सच्चमरशयका वाद्यकलिता,**
**स्थिता चैत्ये नित्यं जनहृदयमाकर्षति मुहुः ॥१०३॥**

(१०३ वि०) तत्रत्यगवाक्षादिसौन्दर्यवर्णनम्। **अतिरुचिरवातायनं** – रमणीयगवाक्षः, वातस्या-ऽयनं – मार्गो वातायनं, **पाञ्चाली** – पुत्रिका, काष्ठादिनिर्मितरमणीयप्रतिकृतिः । *पञ्च्* (उणादि० ४७५) इति *आल*, स्वार्थे *अण्*, ततो वृद्धौ *ङ्यां* च पाञ्चाली। **सच्चमरशयका** – चारुचामरहस्ता, सन् – शोभनः, चमरः – चामरः, *चमरः स्यात्तु चामरः* – इति वचनात्, शये – हस्ते यस्याः सा, *स्वज्ञा०* ।२।४।१०८। इति इकारस्य वैकल्पिकत्वात् प्रकृते सच्चमरशयकेति साधु ॥१०३॥

**प्रभोः शान्तेरन्यद्धवलशिखरन्यस्तकलशं,**
**द्विपञ्चाशच्चैत्यैर्युतमनुपमं मन्दिरवरम् ॥**
**यतः शिल्पं दृष्ट्वा झटिति परलोकं समगमत्,**
**त्रपालीनस्त्वष्टा त्यजति हि गृहं तर्जितजनः ॥१०४॥**

(१०४ वि०) द्विपञ्चाशल्लघुचैत्यपरिवेष्टित-श्रीशान्तिजिनप्रासादस्य शिखरबद्धस्य वर्णनम् । **धवलेति०** – धवलशिखरे न्यस्तः कलशो यस्मिन् तत्। शिल्पं – कला, *शिल्पं कला विज्ञानं च* ।३।५६४। इति हैमः, शल्यते तत् शिल्पं, *पम्पाशिल्पादयः* (उणादि० ३००) इति-पान्तो निपात्यते, **त्वष्टा** – विश्वकर्मा, **त्वक्षति** – तनूकरोति त्वष्टा, *त्वष्टृक्षत्तृदुहित्रादयः* (उणादि० ८६५) इति *तृ*-प्रत्यये निपात्यते। **तर्जितजनः** - तर्जितश्चाऽसौ जनः। *उत्प्रेक्षागर्भितार्थान्तरन्यासः* ॥ १०४॥

**स मानान्तो वर्धः प्रभुगुणसमाकृष्टहृदयो,**
**वदान्यः सन्मान्यः क्वचिदपि सुकार्ये निजधनम् ॥**
**व्ययीकर्तुं चेच्छन् जिनपभवनं शश्वदवनं,**
**समाकार्षीत् प्रेम्णा निजजननसाफल्यमनसा ॥१०५॥**

(१०५ वि० ) वर्णितवर्णयिष्यमाणमन्दिरकर्तुर्वर्धमानश्रेष्ठिनो वर्णनम् । **सः** – प्रसिद्धः । **मानान्तो वर्धः** वर्धमान इति यावत्, **वदान्यः** – दानशौण्डः, **इच्छन्** – अभिलषन्, इषुधातोः शतरि *गमिषद्यमश्छ०* ।४।२।१०६। इति छादेशः । **शश्वदवनं** – सततरक्षकम्, अवतीति अवनं, *नन्द्यादिभ्योऽनः* ।५।१।५२। इति कर्तर्यनः, यद्वा शश्वद् अवनं रक्षणं तर्पणं यतो यत्र वा – शश्वदवनम्, **प्रेम्णा** – स्नेहेन, प्रियस्य भावः प्रेम, *पृथ्वादेरिमन्वा* ।७।१।५८ इति भावे *इमन्*, *प्रियस्थिर०* ।७।४।३८। इति प्रियस्य प्रादेशः । *अनुप्रासः* ।।१०५।।

**प्रभोश्चैत्यं नानाभरणनिवहैर्गर्विंतमिव,**
**स्वशृङ्गाग्रप्रोतध्वजसुमिषतो देवनगरम् ।।**
**भुजोत्क्षेपं कृत्वाऽधिकतरमदो भर्त्सयति किं,**
**प्रभूणां सान्निध्यं भवति न हि केषां मदकरम् ।।१०६।।**

(१०६ वि०) उत्प्रेक्षया तच्चैत्यवर्णनम् । **स्वशृङ्गाग्रेति** – निजशिखरोपरिनिहितपताकाव्याजतः । प्र-वे-क्तः *यजादिवचेः किति* ।४।१।७९। इति *य्वृत्*, **प्रोतः**- स्यूतः निहित इतियावत्, **भुजोत्क्षेपं कृत्वा** – ऊर्ध्वं बाहुमुत्थाप्य, **सान्निध्यं** – सामीप्यम् । *उत्प्रेक्षागर्भितार्थान्तरन्यासः* ।।१०६।।

**मृगाङ्कोऽपूर्वोऽयं भविकजनहृत्तापहरणो,**
**न राहुच्छन्नो नो कृशतरतनुर्नोऽधमगतिः ।।**
**तथा पक्षे युग्मेऽतिविमलविभाशालिसुभगो,**
**जिनेन्द्रः श्रीशान्तिस्त्रिभुवनमुदे यद्विजयते ।।१०७।।**

(१०७ वि०) चन्द्रव्यतिरेकेण श्रीशान्तिप्रभुस्तुतिः । **मृगाङ्कः** - हरिणलाञ्छनः श्रीशान्तिनाथ-प्रभुश्चन्द्रश्च, **राहुच्छन्नः** – तमोग्रस्तः, **अधमगतिः** – अधमे नीचैर्गतिर्यस्य सः, यथा चन्द्रो वृश्चिकरूपस्वनीचस्थाने गच्छति तथा नाऽयं जिनः क्वचिदपि, **पक्षे युग्मे** – शुक्ल-कृष्णा-त्मकोभयपक्षे चन्द्रपक्षे, जिनपक्षे तु मातृपक्षपितृपक्षरूपपक्षद्वये । **अतिविमलेति** – चन्द्रः कृष्णपक्षे निष्प्रभः, जिनचन्द्रस्तु पूर्वोक्तपक्षद्वयेऽपि यशसा नितान्तोज्ज्वलः । *व्यतिरेकालङ्कृतिः* ।।१०७।।

**इति स्तावं स्तावं कलुषभिदुरं षोडशजिनं,**
**सपर्यामाधातुं प्रभुमुपगता भक्तजनताः ।।**
**प्रसूनैः सद्धूपैर्मलयजभवैश्चन्दनचयै-**
**स्तथाऽऽनर्चुर्येषां सुरभिरभितो व्यापदचिरम् ।।१०८।।**

(१०८ वि०) पूर्वोक्तस्तुत्या स्तुत्वा जिनं जनताऽर्चति चन्दनपुष्पधूपादिभिः । **कलुषभिदुरं** -पाप-प्रणाशवज्रं, **सपर्यां** – पूजां, *सपर्*-धातोः कण्ड्वादित्वाद् *यकि, शंसिप्रत्ययात्* ।५।३।१०५। इति *अ*-प्रत्यये स्त्रीत्वादाब्, **प्रसूनैः** – पुष्पैः प्रसूयते स्मेति प्रसूनं, *सूयत्यादि०* ।४।२।७०। इति क्तस्य नत्वम् । **आनर्चुः** – पूजयामासुः, अर्चधातोः परोक्षे द्वित्वे *अनातो नश्चाऽन्ताऋदाद्यशौ संयोगस्य* ।४।१।६९। इति पूर्वस्य अकारस्य आकारः नश्चाऽन्तादेशः – आनर्चुः ।।१०८।।

**इहत्यानां भक्त्या सहजकरुणाप्लावितमना,**
**जिनेन्द्रः स्वावासं समधिकमकार्षीत् सुभवने ।।**
**नमस्या सर्वेषां चरणवरिवस्या जिनपते-**
**र्जनानां सद्भावाकलितचरितानां विलसति ।।१०९।।**

(१०९ वि०) जनभक्त्या समाकृष्टचित्तस्य प्रभोश्चिरनिवासवर्णनं जिनभक्तिवर्णनञ्च । **सहजकरुणेति** – स्वाभाविकदयाद्रवितचित्तः, किरति चित्तं करुणा, ऋकॄवॄ० (*उणादि०* १९६) इत्युणः, **नमस्या** – नमस्कारः, नमःशब्दात्, *नमोवरिवः* ।३।४।३७। इति क्यन्, भावे अः, स्त्रियामाप् – नमस्या, **चरणवरिवस्या** – पादसेवा, वरिवः करणं वरिवस्या, पूर्ववत्सिद्धम् ।।१०९।।

**चिरत्ना सद्रत्ना जिनपवरनेमेः सुरुचिरा,**
**प्रसन्ना सन्मूर्तिः स्मृतिपथगता वाञ्छितकरी ।।**
**समे श्राद्धा ग्रामे सविधि वरिवस्यन्ति सुतरां,**
**तथा देवा यक्षा इह परिचरन्तीक्षितुममूम् ।।११०।।**

(११० वि०) श्रीनेमिनाथप्रभोस्तत्रत्यजनताकृतसपर्यादिवर्णनम् । **चिरत्ना** – चिरन्तनी, पुरातनी-तियावत्, *चिरपरुत्परारेस्त्नः* ।६।३।८५। इति भवार्थे *त्नः*, चिरे भवा चिरत्ना, **समे** – सर्वे, सर्ववाचकः समशब्दः प्रकृते न तु समानवाचकः । **वरिवस्यन्ति** – सेवन्ते ।।११०।।

**नमस्ते कामाङ्गप्रशमनपटिष्ठव्रतिपते !,**
**नमस्ते नेमीश ! त्रिदशललनागीतचरित ! ।।**
**नमस्ते विश्वात्मन् ! भवजलधिमग्नैकशरण !,**
**प्रपन्नार्तिध्वंसिन् ! शमनिरतरागादिरहित ! ।।१११।।**
**नमस्यत्पूर्वाशापतिललितचूडामणिलसत्-**
**प्रसूनस्रग्बद्धभ्रमरकृतगुञ्जारवयुतः ।।**
**त्वदीयांह्रिर्देव ! प्रबलभवदावाग्निविषम-**
**ज्वलज्ज्वालाजालादवितुमिह जागर्ति सततम् ।।११२।।**

**महाकर्मव्यूहाधिपसघनसैन्यव्रजमपा-**
**करिष्णो ! रोचिष्णो ! सकलजनजिष्णोऽर्च्यचरण ! ।।**
**अये ! स्वामिन् ! मुक्तिप्रमदवनिताकान्तहृदया-**
**धिकश्लेषास्वादप्रशमितसमस्तार्तिनिकर ! ।।११३।।**
**विभो ! वारंवारं जननमरणक्लेशनिवहा-**
**धिकक्लान्तस्वान्तः किमपि नहि जाने परवशः ।।**
**इदानीं प्राग्जन्मप्रबलसुकृतोद्बोधनवशात्,**
**परं जाने देव! त्वदनुसरणं क्लेशहरणम् ।।११४।। युग्मम्।।**
**अये ! अज्ञानेनाऽलसपरवशाया च्युतिरभू-**
**त्तदेतत् क्षन्तव्यं सकलजनतातारकविभो ! ।।**
**अहं वारंवारं तव चरणसेवामभिलषन्,**
**भृशं याचे भक्तिं सततमनुरक्तिं पदयुगे ।।११५।।**

(१११- ११५ वि०) श्रीनेमिनाथजिनस्तुतिः । **नमस्ते ते** – तुभ्यं, **नमः** – नमस्कारः, अस्त्विति शेषः, तुभ्यमित्यस्य *ङे-ङसा ते मे* ।२।१।२३। इति *ते*-आदेशः, नमोयोगे *शक्तार्थवषड्नमः०* २।२।६८। इति चतुर्थी, **कामाङ्गेति** – मदनदेहदलनदक्षसंयमिवर !, **नमस्यदिति** – नमस्यन् प्रणमन् यः **पूर्वाशापतिः** – देवेन्द्रः तस्य **ललितः** – मनोज्ञः, **चूडायाः** – मुकुटस्य मणिः चूडामणिः, तस्मिन् **लसन्ती** – विराजमाना, **प्रसूनस्रग्** – पुष्पमाला, तस्यां **बद्धः** – स्थितः भ्रमरः, तेन **कृतः गुंजारवः** – गुञ्जनशब्दः, तेन **युतः** – सहितः, प्रणमन्महेन्द्रमनोज्ञमुकुटमणि-विराजत्कुसुममालान्तःस्थितमधुप-कुलझङ्कारकलित इतियावत् । **त्वदीयांह्रिः** – भवदीयपादः, अंहते यात्यनेनेत्यंह्रिः, *तङ्किवङ्कि०* (*उणादि०* ६९२) इति *रिः* । **प्रबलेति** – **प्रबलः** - महान्, **भवः** – संसार एव **दावाग्निः** – वनवह्निः, तस्य **विषमा** – दुर्गमा ज्वलन्ती या **ज्वाला** – शिखा, तस्या **जालः** – समूहस्तस्मात्, विशालसंसारदावानलकरालप्रसृत्वरशिखावलीतः, **अवितुं** – रक्षितुं, त्रातुं, **महाकर्मेति** – विपुलपापकर्मसमूहस्वामिनिबिडसेनानिकरं, सेनैव सैन्यम् । **अपा-करिष्णो !** – निराकरणशील !, **रोचिष्णो !** – प्रकाशनशील !, रुच्-धातोः शीलार्थे *भ्राज्य-लङ्कृग्०* ।५।२।२८। इति *इष्णु*-प्रत्ययः, **सकलेति** – जननिचयजयनशील !, *भूजेः ष्णुक्* ।५।२।३०। इति शीलार्थे जिधातोः *ष्णुक्*, **मुक्तिप्रमदेति** – मुक्तिगर्विष्ठरमणीकमनीयमानससंसर्गजन्यानन्द-सन्दोहदूरीकृतपीडाकदम्ब !, स्पृहयन्ति मुनयोऽपि तस्यै इति प्रमदत्वं तत्र । **जननेति** – जन्ममृत्यु-पीडानिकरनितान्तश्रान्तमानसः, **जाने** – वेद्मि, ज्ञा-धातोः *जा ज्ञाजनोऽत्यादौ* ।४।२।१०४। इति जादेशः, **परवशः** – पराधीनः, **अलसपरवशाद्** – अलसेति

भावप्रधानो निर्देशः, तथा च न लसतीति अलसः, तस्य भावः आलस्यं, तत्परवशात् तत्परतन्त्रत्वादिति, **च्युतिः** – त्रुटिः। *उत्प्रेक्षानुप्रासाद्यलङ्काराः* ॥१११-११५॥

**इति स्मारं स्मारं जिनपपदसारं मुहुरहो,**
**प्रभोर्गायं गायं निहतभवमायं गुणगणम् ॥**
**अपि स्तावं स्तावं प्रभुवरप्रभावं समजनः,**
**सदा सायं प्रातः प्रणिनमति पञ्चाङ्गविधिना ॥११६॥**

(११६ वि०) जनताकृतप्रभुस्मृतिस्तुतिनत्यादिवर्णनम्। **गायं गायं** – मुहुः प्रगाय, गाधातोराभीक्ष्ण्ये *ख्णम्, आत ऐः कृञ्चौ* ।४।३।५३। इति आकारस्यैकारः, तस्याय्, इति गायं गायं, **निहतेति** – भवस्य संसारस्य माया – भवमाया, निहता ध्वस्ता भवमाया येन स, तं, **गुणगणं** – गुणानां गणो यत्र, तं, **समजनः** – विश्वलोकः, **सायं** – दिनान्ते, स्यतीति सायं, *स्यतेर्णित्* (उणादि० ९३६) इति *अम्*, **प्रातः** – प्रभाते, प्रकर्षेण अतत्यत्रेति प्रातः, *प्रादतेरर्* (उणादि० ९४५) इत्यर्-प्रत्ययः, **प्रणिनमति** – प्रणामं करोति, *अकखाद्यषान्ते पाठे वा* ।२।३।८०। इति नेर्नस्य णत्वं, **पञ्चाङ्ग- विधिना** – यत्र नमस्कारविधौ जानुद्वय-करद्वय-मस्तकरूपाङ्गपञ्चकं संयुज्यते स पञ्चाङ्ग-विधिस्तेन । *छेकानुप्रासः* ॥११६॥

**त्वमप्येनं दृष्ट्वा नतिमतिशयामस्य विदध-**
**त्तथाऽष्टावन्यानि प्रवरभवनान्यत्र नगरे ॥**
**समीक्ष्य प्रत्येकं प्रणम सफलां स्वां कुरु जनिं,**
**न सल्लाभं प्राप्तं विफलयति कुत्राऽपि सुकृती ॥११७॥**

(११७ वि०) प्रधाननवचैत्यप्रणामकरणाय कथनम्। **विदधत्** – कुर्वन्, वि-धा-धातोः शतरि द्वित्वे *अन्तो नो लुक्* ४।२।९६। इति नकारस्य लुक्, **अष्टौ** – अष्टसङ्ख्याकानि, अष्टनः *वाष्टन आः स्यादौ* ।१।४।५२। इत्याकारान्तादेशे अष्ट, *और्जस्-शसोः* ।१।४।५३। इति शसः औकारः, अष्टौ, **प्रणम** – नमस्कुरु, *अदुरुपसर्गान्तरो णहिनुमीनानेः* ।२।३।७७। इति नम्-धातोर्णोपदेशत्वान्नस्य णः, **स्वां** – स्वकीयां, *स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने* इत्यमरः, **विफलयति** – विफलं करोति, *णिज्बहुलं नाम्नः कृगादिषु* ।३।४।१२। इति विफलशब्दात् करोत्यर्थे *णिच्*-प्रत्यये विफलयति । *अर्थान्तरन्यासानुप्रासौ* ॥११७॥

**अथैवं देवानां चरणकमलं वीक्ष्य विमलं,**
**विहङ्ग ! त्वं लब्ध्वा सुकृतभरतो लोचनसुखम् ॥**

**ततश्चाऽग्रे गच्छन् मुनिहृदयवन्निर्मलतरं,**
**प्रशान्तं द्रष्टाऽसि प्रचुरसुखदोपाश्रयवरम् ।।११८।।**

(११८वि०) जिनदर्शनजन्यानन्दप्राप्त्यनन्तरं उपाश्रयावलोकनवर्णनम् । **लब्ध्वा** – प्राप्य, लभ्-क्त्वा, *अधश्चतुर्थात्तयोर्धः* ।२।१।७९। इति क्त्वाघटक-तस्य धः, *तृतीयस्तृतीयचतुर्थे* ।१।३।४९। इति भो बः, लब्ध्वा । **सुकृतभरतः** – पुण्यप्रकर्षात्, **लोचनसुखं** – नयनानन्दम् ।।११८।।

**स लक्ष्मीचन्द्रस्य स्वपितुरतिपुण्यार्थमतुलं,**
**चुनीभ्राता श्रीमान् चतुरमतिसद्धर्मनिरतः ।।**
**वरं लक्ष्मीजैनाश्रमशुभसमाख्यापरिचितं,**
**महद्धर्म्यं रम्यं व्यरचयदनूनव्ययबलात् ।।११९।।**

(११९ वि०) चुनीभ्रातृश्रेष्ठी स्वपितुः स्मरणार्थमुपाश्रयममुं कारितवान् बहुधनव्ययात् । **चतुरेति** – विदग्धधर्मिष्ठः, चतते कर्म इति चतुरः, *वाश्यसि०* (उणादि०४२३) इत्युरः, यद्वा चत्वारः धर्मार्थकाममोक्षरूपाः पुरुषार्थाः सन्त्यस्येति चतुरः, अभ्रादित्वाद् *अः* ।।११९।।

**उदग्रप्रासादस्फुरदमलरत्नद्युतिभर-**
**च्छटाम्लानो ग्लानः पतति रविरम्भोनिधिजले ।।**
**यदीयोच्चैर्भासा जितविधुविभासा पुरवरे,**
**कुमुद्वत्यो म्लानिं क्वचिदपि भजन्ते न बहुले ।।१२०।।**

(१२० वि०) उत्प्रेक्षयोपाश्रयसौन्दर्यवर्णनम् । **उदग्रेति** – उन्नतोपाश्रयभवनदीप्यद्विमलमणिप्रभा-पुञ्जच्छविपराभूतः, उच्चैरग्रमस्येति उदग्रम् – उन्नतं, म्लायति स्मेति **म्लानः** – मलिनः, *व्यञ्जना-न्तस्थातोऽख्याधः* ।४।२।७१। इति तस्य नत्वं, तथैव ग्लानेऽपि, **ग्लानः** – विषण्णः, **अम्भोनिधि-जले** – समुद्रसलिले, **यदीयेति** यन्महाप्रभया, **जितेति** – निर्जितशशिविभया, विशिष्टा भाः विभाः, विधो-श्चन्द्रमसः विभाः विधुविभाः, जिता विधुविभाः यया तया, **कुमुद्वत्यः** – कुमुदिन्यः, प्रमदाश्च, कुमुदिनी-पक्षे कुमुदानि सन्त्यस्यां – कुमुद्वती, *नडकुमुद०* ।६।२।७४। इति डिद्-मतुः । स्त्रीपक्षे कौ – पृथिव्यां मुद् – प्रीतिरस्त्यस्याः – कुमुद्वती, ताः, **बहुले** – कृष्णपक्षे, *स (पक्षः) बहुलोऽसितः* इति हैमः । *व्यतिरेकोप्रेक्षाऽर्थश्लेषालङ्काराः* ।।१२०।।

**ततस्तन्नेदिष्ठं कुसुमनिकुरम्बैः सुरभितं,**
**महद्देवोद्यानं किमु सुरपुरे नन्दनवनम् ।।**
**महोत्साहैः श्रेष्ठिप्रवरकुलजः पोपट इति,**
**प्रसिद्धः सद्धर्म्यं व्यरचयदलं श्राद्धवृषभः ।।१२१।।**

(१२१ वि०) श्रेष्ठिपोपटभ्रातृकारित-लक्ष्मीजैनाश्रमनिकटवर्त्ति-**देवबाग**नामप्रसिद्धोपाश्रयवर्णनम् । **तन्नेदिष्ठं** – तदत्यन्तनिकटस्थम्, अतिशयेनाऽन्तिकं – नेदिष्ठं, गुणाङ्गादिति – इष्ठे *बाढान्तिकयोः साध-नेदौ* ।७।४।३७। इति अन्तिकस्य नेदादेशः, कुसुमनिकुरम्बैः – पुष्पपुञ्जैः, *समवायो निकुरुम्बं जालं निवहसञ्चयौ* । इति हैमः । **सुरभितं** – सुगन्धितं, सुरभिः सञ्जातोऽस्येति, तत्, *तदस्य सञ्जातं तारकादिभ्य इतः* ।७।१।१३८। इति *इतः*, *अवर्णेवर्णस्य* ।७।४।६८। इति पूर्वेकारस्य लुक् तद्धिते परे, **महत्** – श्रेष्ठं, विशालमितियावत्, **देवोद्यानं** – देवबागेति ख्यातं, **सद्धर्म्यं** – सत्-शोभनं सतां वा हर्म्यं – प्रासादस्तं, *ततो हश्चतुर्थः* ।१।३।३। इति हस्य धः, उपाश्रयम्, **अलं** – मनोज्ञं, भूषण- मितियावत्, *अलं भूषणपर्याप्तिशक्तिवारणवाचकम्* इत्यमरः। *उत्प्रेक्षा* ॥१२१॥

**अनुष्ठानं ध्यानं निगमविषयज्ञानमतुलं,**
**प्रकुर्वन्ति प्रेम्णा मुनिजनकदम्बा इह सदा ॥**
**यदीयं रामण्यं कथयितुमलं नो सुरगुरु-**
**र्न वा शेषः साक्षात्कविरपि महाकाव्यरसिकः॥१२२॥**

(१२२ वि०) मुनिजनज्ञानध्यानानुष्ठानकर्तव्यस्थानत्वेनाऽस्य वर्णनपूर्वकं सौन्दर्यवर्णनमुपाश्रयस्य । **अनुष्ठानं** – शास्त्रविहितकर्मादिकरणं, **निगमेति** – आगमविषयकज्ञानं, **मुनिजनकदम्बाः** – श्रमणजनसङ्घाः, *कदिः* सौत्रः, कद्यते – कदम्बं, *कदेर्णिद्वा* (उणादि० ३२२) इत्*यम्बः*, **रामण्यं** - रमणीयतां, **शेषः** – नागाधिपः, श्लिष्यति अस्मिन् धात्रीति शेषः, *श्लिषेः शे च* (उणादि० ५४३) इति षः, शेतेऽस्मिन् हरिरित्यन्ये । *अतिशयोक्तिरनुप्रासश्च* ॥१२२॥

*********

आस्वादः

# द्वात्रिंशद्-द्वात्रिंशिकायाः सारग्राहिणी द्वात्रिंशिका

- मुनिः मुक्तिमण्डनविजयः

न्यायविशारदन्यायाचार्यमहोपाध्यायश्रीयशोविजयवाचकवर्यैः कृतानामनुपमानां शास्त्र-रचनानां मध्येऽन्यतमा रचनाऽस्ति **द्वात्रिंशद्-द्वात्रिंशिका** इति । विविधान् द्वात्रिंशद् विषयानधिकृत्य रचितायां तत्त्वज्ञानखचितायामेतस्यां कृतौ वाचकवर्याणां प्रज्ञायाः प्रकर्षः स्फुटं दरीदृश्यते । एतासां द्वात्रिंशिकानां षोडशकमस्माभिरधीतम् । ततश्च यः सारो मयाऽवगतस्तं प्रतिद्वात्रिंशिकमेकेन श्लोकेन प्रस्तोतुमत्र प्रयासः कृतोऽस्ति ।

## प्रथमः खण्डः

1. **दानद्वात्रिंशिका** सुपात्राय स्वमोक्षार्थं दानं कार्यं महाफलम् ।
बोध्यर्थं च तदन्यस्मै, बलवानाशयो सदा ॥

2. **देशनाद्वात्रिंशिका** ज्ञात्वा श्रोतृरुचिं देय, उपदेशो गुणप्रदः ।
पण्डिताय च बालाय, मध्यमाय विचक्षणैः ॥

3. **मार्गद्वात्रिंशिका** आगम-जीत-संविग्नपक्षा मार्गा भवन्ति हि ।
स्वच्छन्द-शिथिलाचारौ, कुमार्गौ ननु सर्वदा ॥

4. **जिनमहत्त्वद्वात्रिंशिका** संवादिन्यायसंयुक्तान्महत्त्वं वचनाद् जिने ।
भक्तिर्जिनस्य बीजं स्याच्छाश्वतानन्दसम्पदः ॥

5. **भक्तिद्वात्रिंशिका** भक्तिः पूर्णतया ज्ञेया, जिनाज्ञापालनं मुनेः ।
द्रव्यस्तवो गृहस्थस्य, नीतिमतश्च देशतः ॥

| | |
|---|---|
| 6. **साधुसामग्र्यद्वात्रिं.** | यथार्थभिक्षु-वैरागि-ज्ञानिनः साधुता वरम् ।<br>जिनशासनमालिन्यं, बोधिदौर्लभ्यकारणम् ॥ |
| 7. **धर्मव्यवस्थाद्वात्रिं.** | एतद् धर्मव्यवस्थानं, भावक्रियासमन्वितम् ।<br>दया-तपोविशेषौ च, भोजन-कामसंयमौ ॥ |
| 8. **वादद्वात्रिंशिका** | शुष्कवाद-विवादौ द्वौ, धर्मवादस्ततोऽपरः ।<br>विषयो धर्मवादस्य, ह्यहिंसासाधनं परम् ॥ |
| 9. **कथाद्वात्रिंशिका** | अभ्यासमुचितं कृत्वा, समयज्ञः कथां वदेत् ।<br>परिकर्मितप्रज्ञावान्, कुशलवैद्यसन्निभः ॥ |
| 10. **योगलक्षणद्वात्रिं.** | फलदा आशयाश्चित्तभावाः कुशलयोगिनः ।<br>क्रिया भावविशिष्टाः स्युः, परमानन्दहेतवः ॥ |
| 11. **पातञ्जलयोग-<br>लक्षणद्वात्रिं.** | कूटस्थनित्यसिद्धान्तं, पातञ्जलस्त्यजेद् यदि ।<br>जैनमतेन तद्दृष्टस्तुल्यप्राया भवेन्ननु ॥ |
| 12. **पूर्वसेवाद्वात्रिंशिका** | पूर्वसेवा गुणग्रामा, योगस्य पूर्वभूमिका ।<br>अकदाग्रहिणं सन्तं, मुक्त्यद्विषमपेक्ष्य च ॥ |
| 13. **मुक्त्यद्वेषद्वात्रिंशिका** | तुर्यतद्धेत्वनुष्ठाने, मुक्त्यद्वेषो भवेत् सदा ।<br>तदर्जितक्रियारागः, परमानन्दकारणम् ॥ |
| 14. **अपनुर्बन्धकद्वात्रिं.** | अपुनर्बन्धको द्रव्य-योगी शान्तो महाशयः ।<br>धर्मो योग्योऽखिलस्तस्याऽसद्ग्रहविनिवृत्तितः ॥ |
| 15. **सम्यग्दृष्टिद्वात्रिंशिका** | देहमत्र मनो मुक्तौ, भवेद् भावविशेषतः ।<br>संसारहेतवः सम्यग्दर्शिनो मुक्तिहेतवः ॥ |
| 16. **ईशानुग्रहविचारद्वा.** | जिनाज्ञापालनं देव-कृपा ज्ञेया, ततो भवेत् ।<br>निश्चितेऽनिश्चिते वाऽपि, तत्त्वे भव्योऽकदाग्रही ॥ |

*****

आस्वादः

# भाव-प्रतिभावौ

- सा.हंसलेखाश्रीः
(शासनसम्राट्-समुदायसत्का)

मनःशक्तिरस्त्यस्माकं कृते महोपलब्धिः । तस्याः सदुपयोगः कथं कर्तव्य इति हि काचिन्महती कला । अस्माकं मनोऽस्ति शुभाशुभभावानामुत्पत्तिस्थानम् । मनसि कृता विचारा भित्तावास्फालितस्य कन्दुकस्येव प्रक्षेपकं प्रत्येव प्रत्यागच्छन्ति । अतः कस्यचिदपि जनस्य विषये विचारणकालेऽस्माभिः शुभा भावा एव भावनीया येन तत्प्रतिभावरूपेण वयं शुभानेव भावान् प्रतिलभेमहि ।

अत्राऽर्थे उदाहरणमेकं प्रस्तूयते । कस्यचिन्नृपस्य प्राज्ञो मन्त्री तस्मै एकदा परामर्शं प्रदत्तवान् - " महाराज ! अन्यजनसम्बन्धिन्यां विचारणायामस्माभिर्विकल्परहिततया तटस्थतयैव वा प्रवर्तितव्यं, न पुनः पूर्वाग्रहेण क्लिष्टेन मनसा वा " ।

राजा प्रत्यवदत् - " अस्माकं मनसि तु नैके विचाराः स्फुरन्त्येव प्रतिक्षणं, तांश्च ज्ञातुं न कोऽपि समर्थो भवेत् । यतः कमपि जनं लक्ष्यीकृत्य विचारितमस्मदभिप्रायं को वा जानीयात् ? "

मन्त्रिणोक्तं - " राजन् ! अस्माकं विचारा यद्यपि न कैश्चिज्ज्ञायन्ते तथाऽपि तेषां छाया परचित्ते पतत्येव । एतदर्थं प्रयोगमेकं कुर्महे । पश्यतु तत्र, कश्चन जन आगच्छन्नस्ति । तमधिकृत्य भवान् मनसि कोपं जनयतु, तस्मै चपेटैका देया – इति च विचारयतु " ।

राज्ञा तथैव विमृष्टम् । तावता स जनो राजान्तिकमागतस्तं प्रणम्य च गन्तुमारब्धः । तदा तमाहूय मन्त्रिणा पृष्टं - " भोः ! भवन्मनसीदानीं राजानमधिकृत्य किं चिन्तनं प्रवर्तते ? "

तदा क्षुब्ध उत्तरं च दातुमनिच्छन् स जनो मस्तकमवनम्य मौनं स्थितः ।

मन्त्रिणा सान्त्वनं ददता कथितं - " भो ! मा भैषीद् भवान् । महाराजो भवतेऽभयं दत्तेऽतो मे प्रश्नस्य सत्यमुत्तरं ददातु " ।

तथाऽपि भयेन कम्पमानः सोऽवदत् - " अत्राऽऽगच्छता निष्कारणमेव मे महाराजविषये कोपबुद्धिर्जाता । मन्मनसि राज्ञे चपेटामेकां दातुं तीव्रेच्छा जाता " । तच्छ्रुत्वा स्मितं कुर्वन् राजा तं विसृष्टवान् ।

तावता कश्चनाऽन्यो जनः समागच्छन् दृष्टः । मन्त्रिणोक्तं - " स्वामिन् ! अस्य विषये किञ्चन शुभं चिन्तयतु भवान् " । राजा तथैव चिन्तितवान् । ततः समीपमायातं तं जनं मन्त्री पृष्टवान् - " महाराजपार्श्वमागच्छतो भवते चित्ते कीदृशा विचाराः स्फुरिताः ? " तदा सहर्षं सोऽवदत् – महाराजः परमदयालुरस्ति, तदीये न्यायान्विते सुशासने सर्वा अपि प्रजाः सर्वथा सुरक्षिताः सन्ति सुखं शान्तिं चाऽनुभवन्ति । स चिरकालं जीवतु राज्यमेतच्च पालयतु – इत्यादिका विचारा मन्मानसे स्फुरिताः " ।

अनयोर्द्वयोरपि जनयोः प्रतिभावौ ज्ञापयतो यत् – अस्मच्चित्ते स्फुरन् प्रत्येकं विचारो भावो वा सदृशमेव प्रतिभावं विरचयति । प्रक्रियैषा विचारसङ्क्रमण(telepathy)मित्युच्यते । वयमप्यनुभवामो नैकवारं यद्, यं वयं पूर्णेन मनसा स्मरामः सोऽप्यस्मान् तदा स्मरन्नेवाऽऽस्ते । यस्य कस्याऽपि विषयेऽस्माकं चित्ते यादृशो भावो जागर्ति तादृश एव प्रतिभावस्तस्य मानसेऽपि स्फुरत्येव । अतो मनःशक्तेः सदुपयोगः सर्वत्र शुभभावानां प्रसारणायाऽशुभभावानां निवारणाय शोधनाय च कर्तव्यो न पुनरशुभभावानां प्रसारणाय ।

अतः स्वस्थेन मनसा वयमपि सर्वजनहितं सर्वजनसुखं चैव चिन्तयेम सर्वत्र च शुभभावधारां प्रसारयेम – इति ॥

*****

आस्वादः

# मनोगुप्तिः

- सा. विजयलेखाश्रीः
(शासनसम्राट्-समुदायसत्का)

ज्ञानिभिर्महापुरुषैर्नानाविधेषु शास्त्रेषु - जीवनमर्थपूर्णं कथं भवेद् - इत्येतदधिकृत्य नैके उपाया उदाहृताः । अथैतेषामुपायानां सिद्ध्यर्थं मनःस्वास्थ्यस्य रक्षा खलु पूर्वापेक्षिताऽस्ति । परिस्थितिः कियत्यपि विषमा भवतु नाम, अस्माभिर्मनःस्वास्थ्यं रक्षितं चेदस्मज्जीवनं सर्वथा-ऽर्थपूर्णं भवेदेव । एतस्य मनःस्वास्थ्यस्य रक्षणार्थं जैनैः शास्त्रकारैर्मनोगुप्तिः प्रतिपादिताऽस्ति । सा च मनोगुप्तिः शुभयोगेषु प्रवृत्तिरूपाऽशुभयोगेभ्यश्च निवृत्तिरूपेति द्विधा प्रतिपादिता ।

महोपाध्याय-न्यायविशारद-श्रीमद्यशोविजयवाचकैः श्रीअध्यात्म-मत-परीक्षाभिधे ग्रन्थे मनोगुप्तिस्त्रिधा वर्णिताऽस्ति । तद्यथा –

१. आर्त-रौद्रध्यानानुबन्धिकल्पनाजालवियोगः,

२. परममाध्यस्थ्यपरिणतिः,

३. योगनिरोधावस्थाभावी सर्वथा मनोनिरोधश्च ॥

यद्यपि मनोगुप्तेरन्त्यौ द्वौ प्रकारौ समाचरितुं दुष्करावेव तथाऽपि प्रथमो भेदस्तु सरलतयाऽऽचरणीय एव ।

अस्माकं मनोऽनवरतमार्त-रौद्रध्यानयोर्लीनं भवति । किं तत्र कारणम् ? ननु कारणानामावलिरेव भवेदवधिरहिता । परन्तु सर्वेषां कारणानां मूलं तु भूतकालीनघटनाजन्योद्वेगो वा भविष्यत्कालीनाया अद्याप्यघटिताया घटनायाः कल्पना वा । एतादृशकल्पनानां जालेनाऽस्माकं सुखानन्दयोर्द्वाराणि पिहितानि भवन्ति । यतो दृष्ट्यगोचराणां विषयाणां वितर्केष्वस्माकं मनः सदैव व्यापृतमेव भवति ।

अत्रार्थे दृष्टान्त एकः प्रस्तूयते - कुत्रचिन्नगरे एकदा धर्मसभाऽऽयोजिता । अथ तद्दिन एव काचन महिला धर्मसभाया प्रारम्भात् पूर्वमाचार्यस्य प्रकोष्ठं गता सदुःखमवदच्च – " मम पुत्रो

मयाऽऽदिष्टं न करोति कदाऽपि। यदि वारं वारमेवमेव भविष्यति तदा स मया चेष्यमाणां कन्यामपि न वरिष्यति, तदा चाऽहं किं करिष्ये ....? "

तदाऽऽचार्येण सोक्ता – " चिन्तां मा करोतु भवती, श्वो भवत्याः पुत्रमत्राऽऽनयतु, अहं तस्य हितं बोधयिष्यमि "।

ततः सा द्वितीयदिने स्वीयं पञ्चवर्षदेशीयं बालकमानीय तमाचार्यवर्यस्य पुरत उपस्थापितवती कथितवती च – " प्रभो ! अयमेव मे पुत्रकः। यदाऽहं तं भोजयितुं प्रयतेय तदा "नास्ति मम भोजनेच्छा" – इत्यादिकं वदन् भोजनं नैव करोति। फलके वर्णमालां लिखतु – इति मयोक्ते सति स तदवमन्य चित्राण्येवालिखति। किमपि कृत्वैनं वारयतु मदादिष्टं च कर्तुं बोधयतु कृपया। इत्थमेव स यदि बाल्यकाल एव स्वीयं हठं न मोक्ष्यति तदा यौवने विवाहावसरे स मम कथनं नैव श्रोष्यति "।

तस्या एतादृशीं वाचं श्रुत्वाऽऽचार्यवर्योऽपि स्वहासं निरोद्धुमशक्नुवन् किंवक्तव्यतामूढः सञ्जातः।

वयमप्येवमेवाऽनर्गलेन मनोव्यापारेण कल्पनाजालं प्रसार्याऽस्माकं सुखद्वाराण्य-वरुध्यामहे, निष्कारणमेव च दुःखैः स्वं पीडयामः।

तपागच्छाधिपेन पूज्याचार्यवर्येण श्रीमुनिसुन्दरसूरीश्वरेणाऽपि **श्रीअध्यात्मकल्पद्रुम**-नामके ग्रन्थे – मनः संसारचक्रभ्रमणैकहेतुरूपेण वर्णितमस्ति। तत्र संसारस्य तुलना चक्रेण सह कृता। एकदा प्रबलव्यापारेण यदि चक्रस्य गतिरारब्धा ततः परं विनाऽऽयासमेव तस्य बम्भ्रमणं भवत्येव। तत्पश्चात् तस्य गतिमवरोद्धुं प्रयत्नशतैरपि दुष्करमेव। अस्माकं मनो विविधैर्विचारैः संसारचक्रं गतिमत् करोति। तद्गतिमवरोद्धुं प्रयत्नशतैरपि दुष्करं, तथाऽपि मनोगुप्त्याः सामर्थ्येन वयं तच्चक्रं स्थगयितुं सर्वथा शक्ता एव। चलन्तु, वयमपि मनोगुप्तिरूपं संसारचक्रस्थगनो-पायमाचरेम।

*****

पुस्तकसमीक्षा

# विचारोपायनम्

- प्रा. मधुसूदनः म. व्यासः

विश्रुतसाहित्यकारेण श्रीजयन्तमेघाणीवर्येण वैश्विकसुभाषितानां सञ्चयः गूर्जरभाषया कृतोऽस्ति । ततः केषाञ्चिच्चितानां सुभाषितानां संस्कृतानुवादरूपेण प्राप्तैषा पुस्तिका पूज्यया जैनसाध्व्या श्रीविजयलेखाश्री-इतिनाम्न्या विदुष्या सकौशलमनूदिताऽस्ति ।

तत्र प्रारम्भे **मनःसंवेदनम्** इत्याख्ये प्राक्कथनेऽनुवादकर्त्र्योल्लिखितं यत् – सामान्यतया चातुर्यं, बुद्धिः, मतिः, अवगमः, प्रज्ञा – इत्यादयः शब्दाः समानार्थाः प्रतिभासन्ते, किन्तु तेषां मध्ये या सूक्ष्मा भेदरेखा तां ज्ञातुं न कोऽपि प्रयतते..... । अनेन प्रयासेन वयमेतदपि ज्ञातवन्तो यत् – कुत्र स्थाने कस्य शब्दस्य प्रयोगो वाक्यं परिपूर्णतामवगमयोग्यतां च प्रति नयति .... । अनया रीत्या व्याकरणशुद्ध्या सह भाषाशुद्धिरपि भवति ।

मुनिवर्येण कल्याणकीर्तिविजयमहाभागेन ग्रन्थादावाशीर्वचांसि लिखितानि ।

प्रत्येकं सुभाषितं सम्यक् पठ्यते चेज्ज्ञायते यत् – पदे पदे तपःपूतमनुवादकार्यं महता परिश्रमेण भाषाकौशलेन च कृतमस्ति । मूलत एतानि सुभाषितानि विविधानां वैश्विकसाहित्यकाराणां चिन्तनात् प्रकटितानि सन्ति । तानि सुभाषितानि देवभाषयाऽनूद्य साध्वीवर्यया संस्कृतसाहित्यं सुतरां समृद्धीकृतमस्ति । प्रत्येकं वाक्यान्यर्थघनानि जीवनोपयोगीनि च वर्तन्ते । एतैरुत्तमविचारपूर्णैः सुभाषितैरस्माकं चिन्तनबिन्दूनां लाभो भवति हृदयं च प्रेम्णाऽऽह्लादेन च परिप्लावितं भवति ।

व्यावहारिकदृष्ट्याऽप्यस्या पुस्तिकाया उपयोगः स्वयंसिद्ध एव । वर्तमानकाले सर्वस्याऽपि वस्तुनो व्यवहारे क उपयोग इति परीक्ष्यते । तत्रेदं पुस्तकं सर्वथोत्तीर्णं भवति ।

कानिचन वाक्यानि विलोकयामः –

रोदितुमसमर्थायाः प्राज्ञतायाः
हसितुमसमर्थायास्तत्त्वज्ञतायाः
शिशूनां पुरतोऽवनन्तुमसमर्थाया महत्तायाश्च
अहं दूरे स्थातुकामः ।। - खलिल जिब्रान

रत्नानि कङ्कणानि – एतान्युपहारस्य प्रतीकमात्राणि, न तु वस्तुत उपहारः ।
यथार्थं प्राभृतं तु निजस्याऽऽत्मन एकैकः अंश एव ।। - एमर्सन

योजनसहस्रमिताया अपि यात्रायाः
प्रस्थानं त्वेकेनैव पदेन भवति ।। - ला-ओ-त्सु

गिरेर्दुर्धर्षमारोहणमस्मान् पराभवति ।
किन्तूपानहि समापतितो लघुकङ्करोऽस्मान् तोतुद्यते ।

इत्थं बहूनि सुन्दराणि विचाररत्नान्यत्र विविधेषु वाक्येषु विकीर्णानि सन्ति । यद्यपि **तोतुद्यते** – सदृशाः कठिनप्रयोगा अस्यां पुस्तिकायां विनियुक्ता दृश्यन्ते येऽस्मादृशानां विद्यार्थिनां कृते दुरवगमा भवन्ति, तथाऽपि पुस्तिकैषा संस्कृताभ्यासिनां कृते भृशमुपयोगिनी वर्तते इत्येतदर्थ-मनुवादिका साध्वीश्रीविजयलेखाश्रीरवश्यमभिनन्दनीया ।।

*******

# शब्दपूरणी

- मुनिः निर्ग्रन्थचन्द्रविजयः
(डहेलावाला समुदायसत्कः)




**★ वामतः दक्षिणम्**

२. सिकता, तृतीयनरकेऽस्या आधिक्यं वर्तते। ३

५. असुररिपुस्त्रिदशो वा, विसर्गरहितः। ४

६. मदनः, कामदेवः। विसर्गरहितः। ४

७. अदनं, यक्षपदं स्मारयति। ३

९. अलङ्कारशास्त्रेषु वैदर्भ्यादिभेदतः प्रसिद्धः

वाक्यविन्यासः पदसङ्घटना वा, विसर्गरहितः। २
११. महिषवाहनः, मृत्योर्देवता। २
१२. रामभ्राता, तस्मिन्नत्यन्तानुरक्तः। ३
१३. पापर्द्धिः, सप्तसु व्यसनेष्वन्यतमा। ३
१४. कृष्णवर्णवर्णितो विहगः। विसर्गरहितः २
१६. शरीरे कृष्णवर्णीयं सूक्ष्मचिह्नम्। विसर्गरहितम्। २
१८. पुत्रः, विसर्गरहितः। ३
२०. अरघट्टकः, जलनिष्कासनसाधनम्, अनुस्वाररहितम्। ४
२१. चित्ताकर्षकं, सुन्दरम्, अनुस्वाररहितम्। ४
२२. अरविन्दम्। ३

## ★ उपरिष्टादधः

१. दक्षिणदेशे स्थिता काचिन्महानदी। ४
२. जलसमुद्भवं, कुशेशयम्, अनुस्वाररहितम्। ३
३. हेतुर्निमित्तं वा, अन्ते मरुभूमिरस्ति। ३
४. व्यामोहश्चित्तविपर्यासो वा। ४
८. व्रणम्। २
१०. भालभूषणं, तमालपत्रम्, अनुस्वाररहितम्। ३
११. प्रसिद्धश्चन्द्रवंशी राजा, नहुषपुत्रो वा। विसर्गरहितः। ३
१४. समुद्रमन्थनादुत्पन्नं हालाहलम्। ४
१५. अरण्यम्, अनुस्वाररहितम्। २
१७. ललाटोपरि स्थिता पुष्पमाला। ४
१८. नूतनं वस्त्रं, विसर्गरहितम्। ३
१९. युग्मम्, आदौ कृतान्तो विद्यते। ३

********

(शब्दपूरण्या उत्तराण्यस्यामेव शाखायामन्यत्र प्रदत्तानि सन्ति।)

# काव्यानुवादः

- गूर्जरमूलम् – **रमेशः पारेखः**
- संस्कृतम् – **कल्याणकीर्तिविजयः**

## विधान

आपणा एक जाणीता तत्त्वचिन्तके कह्युं छे :
प्रत्येक आपघात ए आखा समाज सामेनुं
तहोमतनामुं छे.
पण ज्यारथी जाण्युं छे के,
हिटलरे अंते आपघात करेलो,
त्यारथी थाय छे के –
आ तत्त्वचिन्तकनुं विधान
हिटलर अने यहुदीओ सुधी न पहोंचे तो सारुं !

## विधानम्

विश्रुतेनैकेन तत्त्वचिन्तकेन कथितम्
प्रत्येकमात्मघातः समग्रं समाजं प्रति
अभियोगः
किन्तु यावता मया श्रुतं यत् -
हिटलरेणाऽपि आत्मघातः कृत इति
तावता मनस्येवं भवति यत् –
तत्त्वचिन्तकस्याऽस्य विधानमिदं
हिटलरस्य यहूदीयानां च कर्णयोर्यदि नैव
पतेत् तदा वरम् !

*********

## पुष्प एटले

फूल
तो वृक्षे पेटावेला दीवा छे
ए जोवा के
सुगंधमां डूबकी मारे एवा
कोण मरजीवा छे !

## पुष्पम्

पुष्पाणि
तु वृक्षेण प्रदीपिता दीपाः सन्ति
एतद् द्रष्टुं यत्
सुगन्धे निमज्जन्तः
के वा विगाहकाः सन्ति !

*********

कथा

# दिव्योंऽशः

- मुनिः शीलचन्द्रविजयः

**(डहेलावाला समुदायसत्कः)**

भगवता खलु निखिला सृष्टिर्विरचिता । तदनन्तरं सर्वान् देवदूतानाहूय कथितं तेन - " पश्यन्तु, अधुनाऽहं मत्प्रतिकृतिरूपान् मानवान् रचयन्नस्मि " इति । ततो देवदूतानां समक्षमेव भगवता मानवा विनिर्मिताः प्राणभृतश्च विहितास्ते । ततस्तान् पृथ्वीतले सम्प्रेष्य भगवता क्षणं विश्रामः कृतः ।

अथो भगवन्मनसि कश्चन विचार आविर्भूतः । अतः स पुनरपि देवदूतानाहूय प्रोक्तवान् यद् - " अधुनाऽहं मनुजानां कृते पृथिव्यामेव स्वीयं दिव्यमंशं निधातुमिच्छामि । परन्तु ते खलु सौकर्येण तं यथा न प्राप्नुयुस्तथा तं गोपायितुमिच्छामि । अतो भवतां परामर्शमिच्छामि – वदन्तु तावत् कुत्र खलु स दिव्योंऽशो निधेयः ? "

" प्रभो ! भवान् तं दिव्यमंशं किमिति गोपायितुमीहते ? जना यथा सरलतयैव तं प्राप्नुयु-स्तथैव स निधातव्यः खलु ? " – इति कथितवन्तो सर्वे देवदूताः ।

" नैव भोः ! विनाऽऽयासमेव प्राप्यमाणानां वस्तूनां महत्त्वं मानवैर्नैवाऽवगम्यते । अत-स्तादृशं किञ्चन स्थानं गवेषयन्तु यन्मनुष्या सरलतया न प्राप्नुयुः " – इति भगवतोक्तम् ।

" एवं, तर्हि कस्मिंश्चित् प्रोन्नते दुरूहे च पर्वतीये शिखरे तमंशं निदधातु " ।

तदा निषेधयता भगवता गदितम् - " अहं मनुष्यान् साहसरसिकान् विनिर्मितवानस्मि । ते खलु यत्किमपि प्रोच्चं दुरूहमपि च शिखरमारोहेयुरेव । तत्पश्चाच्च तादृशान् मार्गानपि ते कल्पेरन् यैर्विनायासमेव तत्र गन्तुं शक्येत " ।

" तर्हि प्रभो ! कस्यचन महासागरस्य दुष्प्रापे द्वीपे तं गोपायितुं शक्येत किम् ? " – इति विमर्शानन्तरमुदितं देवदूतैः ।

" तन्नैव शक्यम् । मानवानहं बुद्धिशालिनोऽपि विहितवानस्मि । गच्छता कालेन ते महा-नौकादीनि निर्माय सुकरतया तत्र गत्वा दिव्यमंशं लब्धुमर्हन्त्येव " – इति भगवता तेषामिदं सूचनमपि निराकृतम् ।

"पृथ्व्या गभीरे तले निखाय स निधीयेत चेत् ? " – इति देवदूता भृशं विमृश्योक्तवन्तः ।

" तथाऽपि कर्तुं नैव योग्यम् । अन्यदा मनुजाः पृथ्वीमपि गभीरतलं यावत् खनितुं शक्ता भवेयुरेव " ।

इदानीं देवदूता निरुत्तरा जाताः । हस्तौ योजयित्वा मस्तकं च नामयित्वा ते विनम्रतया भगवते कथितवन्तः - " प्रभो ! अतः परं वयं न कमप्युपायं चिन्तयितुं शक्ताः । परं भवांस्तु सर्वज्ञोऽस्ति । भवतैव वक्तव्यं यत् स दिव्योंऽशो जगति कुत्र गोपायितुं शक्यो येन मानवाः खलु तमल्पायासेन नैव लभेरन् " - इति ।

सस्मितं भगवान् गभीरया वाचोक्तवान् - " अहं तं दिव्यमंशं तथा गोपायितुमिच्छामि यथा मानवा महता परिश्रमेणैव तं प्राप्तुं शक्ता भवेयुर्न पुनः सौकर्येण " ।

" प्रभो ! कुत्राऽस्ति तादृशं स्थानं यतो मनुष्या गोपितं दिव्यमंशं सौकर्येण नैव प्राप्नुयुः ?"

भगवता कथितं - " तादृशं स्थानमस्ति मनुष्यस्य हृदयम् । जनाः खलु स्वहृदयं नैव गवेषयिष्यन्ति, यतस्तत् तादृशं दुर्गममस्ति यत्ते तदवगाढुं, तत्पारं प्राप्तुं, तत्र च निहितं दिव्यमंशं लब्धुमतीव दुःशकम् । अयमेव मार्गो जनानां कृते सर्वथा दुर्गमो भविष्यति " इति ।

**

भगवतः कथनं पूर्णतया सत्यं नाऽनुभूयते किल ? मानवाः खलु सर्वथा दुरूहम् एवरेस्ट-शिखरमप्यारूढवन्तः, महासागरस्य यं कमपि द्वीपं सुगभीरं तत्तलं चाऽपि प्राप्तवन्तः, भूमिमपि च गहनतया खातवन्तः, किन्तु....भगवता यथोक्तं तथा.... ते हृदयस्य गभीरं तलं नैवाऽवगाढुं शक्ता अद्याऽपि, यतः स एव मार्गो जनानां कृतेऽतीव दुर्गमोऽस्ति ।।

*****

कथा

# मानवसेवा

- मुनिः त्यागमण्डनविजयः

कस्यचिन्नगरस्य मुख्यविपणौ फलापण एक आसीत्। एकदा कश्चन फलग्राहकस्तत्रा-ऽऽगतः फलक्रयणार्थम् । स फलानां मूल्यमपृच्छत् । विक्रयिक उक्तवान् – " किलोमितानां कदलीफलानां चत्वारिंशद् रूप्यकाणि नारङ्गफलानां च शतं रूप्यकाणि मूल्यम् " । स ग्राहकः फलानि चिन्वन् यावत् स्थितस्तावतैव काचन विदीर्णवस्त्रा श्याना धूलिधूसरगात्रा च दरिद्रा स्त्री तत्राऽऽगता । सा पृष्टवती - " भोः भ्रातः ! कदलीफलानां नारङ्गफलानां च किं मूल्यम् ? " इति । विक्रेतोक्तवान् - " क्रमशो दश रूप्यकाणि त्रिंशद् रूप्यकाणि च " । श्रुत्वैतत् तस्या मुखं प्रसन्नतापूर्णं जातम् । तयोक्तं - " तर्हि झटिति मे द्वयमपि किलोमितं यच्छतु भवान् " ।

तदा विपणौ प्रथममागतो ग्राहकस्तं विक्रेतारमविश्वासपूर्णया दृष्ट्या दृष्टवान् किमपि वक्तुं चोद्यतो जातः । अतः स विक्रेता तं प्रतीक्षितुं सङ्केतितवान् ।

फलक्रयणं कृत्वा हृष्टवदना सा स्त्री निर्गता विपणितः । गच्छन्त्याश्च तस्या मुखात् सहसा-ऽऽशीर्वचांसि निःसृतानि - " प्रभो ! भवतः शतश उपकारा मयि सन्ति । भवत्कृपयाऽद्य मे बालकाः फलानि खादित्वा भृशं तृप्ता भविष्यन्ति " ।

गतायां च तस्यां स ग्राहकः प्रश्नसूचकदृष्ट्या विक्रयिकमवलोकितवान् । तदा तत्समाधानार्थं फलविक्रेता कथनारम्भं कृतवान् - " भो महाशय ! ईश्वर एवाऽत्र साक्षी । मया भवता सह काऽपि वञ्चना नैव कृता न चाऽप्यसत्यभाषणं कृतम् । सा खलु स्त्री विधवाऽस्ति । तस्याश्चत्वारोऽनाथा बालकाः सन्ति । परं सा खल्वतीव स्वावलम्बिनी । कस्यचिदपि साहाय्यग्रहणं न कदाऽपीच्छति सा । अथ च साऽऽर्थिकतयाऽतीव दुर्बलेति स्वबालकानामुदरपूरं भोजनमपि सम्पादयितुमशक्ता । अतो मयैष मार्गोऽन्विष्टः । यदाऽपि फलार्थमागच्छति सा तदा निःशुल्कानि फलानि ग्रहीतुं नेच्छन्त्यै तस्यै न्यूनतममूल्येन फलानि यच्छाम्यहम् । अनेनोपायेन तस्याः स्वावलम्बिताया रक्षणमपि भवति तत्साहाय्यं चाऽपि भवति । एवंरीत्येश्वरस्य पूजामहं करोमीति चिन्तयामि " ।

किञ्चित् स्थित्वा कण्ठं च शोधयित्वा स विक्रेता स्वकथनमनुवर्तितवान् - " एषा स्त्री प्रतिसप्ताहमेकवारमेवाऽऽगच्छति । किन्तु यदाऽपि साऽऽगच्छति तद्दिने निश्चयेन मम व्यवसायोद्विगुणितो भवति। तयोक्तान्याशीर्वचांसि निश्चयेन फलन्ति, तथा चेश्वरकृपां तदा साक्षादेवा-ऽनुभवाम्यहम् "।

आऽन्तं तत्कथनं श्रुत्वा स ग्राहको भावनासमुद्रे निमग्नोऽभवत्। तस्य नेत्रे आर्द्रीभूते। स फलविक्रयिकं दृढमालिङ्ग्याऽऽवश्यकतानुसारं फलानि गृहीत्वाऽऽपणान्निर्गतः।

किन्तु सहसा किञ्चित् स्मृत्वा स पुनरप्यापणं प्रविष्टः स्वीयकोषाद्धनभस्त्रिकां निष्कास्य ततः पञ्च सहस्रं रूप्यकाणां तस्य फलविक्रयकस्य हस्ते सानुनयं मुक्त्वाऽवदत् – " यदा सा स्त्र्यागच्छेत् फलार्थं तदा धनमेतदुपयोज्यं भवता " । ग्राहकस्येदृशीं सद्भावनां दृष्ट्वा फलविक्रयिकोऽपि गद्गदोऽभवत् तदाभारं चाऽमन्यत।

आनन्दवितरणस्य नूतनान् मार्गान् स्वयमीश्वर एव दर्शयति। अस्माभिस्तदादेशः पूर्णसमर्पणेन पालनीयः। एषैव ननु मानवसेवा नाम ! !।

*****

कथा

# स्वार्थ-निःस्वार्थौ

- मुनिः आत्मकीर्तिविजयः

## स्वार्थः

एकः कश्चन महत्त्वाकाङ्क्षी युवकः कस्मिंश्चिद् दैनिकपत्रकार्यालये पत्रकारिताशिक्षणार्थं प्रवेशं प्राप्तवान् । कार्यालयीयैः स दिनत्रयं गभीरतया सर्वं शिक्षितः । ततः स विलक्षण-समाचारान्वेषणार्थं नगरमटितुमादिष्टः । षड् घण्टा यावदातपेऽटितोऽपि स दैनिकपत्रोपयोगिनं कमपि समाचारं नैव प्राप्तवान् । अतो निराशो भूत्वा स कार्यालयं प्रत्यागच्छन्नासीत् ।

आगच्छन् स जन-वाहनैः सङ्कीर्णं त्रिपथमेकं प्राप्तः । मार्गावकाशार्थं तत्र स्थितः स विरुद्धमार्गद्वयाभ्यामागच्छन्ती द्वे बस्-याने दृष्टवान् । तेनाऽवगतं यद् द्वयोरपि यानचालकयोः पुरत आगच्छद् बस्-यानं नैव दृश्यते स्म, अतो द्वयोरपि परस्परं सङ्घट्टनमनिवार्यमासीत् ।

तदा किञ्चिद् विचिन्त्य प्रत्युत्पन्नमतिः स युवा मध्येमार्गं हस्तौ वेगेन सञ्चालयन् पूर्णशक्त्या च विनर्दन् धावित्वा तयोर्यानचालकयोर्ध्यानमाकृष्टवान्, बस्-याने चाऽवरोद्धुं सफलो जातः ।

ततो द्वयोरपि यानयोश्चालकौ यात्रिणश्च दुर्घटनानिवारके तस्मिन् भृशं प्रमुदिता अभवंस्तस्याऽऽभारं च मन्तुं बस्-यानादवतीर्णाः सन्तस्तं हस्तसंस्पर्शेन सम्भाव्य समाश्लिष्य च स्वीयं कार्तज्ञ्यं प्रकटितवन्तस्तत्प्रशंसां च कृतवन्तः ।

ततः स स्वकार्यालयं प्राप्तः सन्नधिकारिणे सर्वमपि वृत्तं निवेदितवान् सोत्साहम् । तदा सोऽधिकारी, " मूर्खो भवान्, यतो या घटना श्वस्तनीयदैनिकपत्रस्य मुख्यसमाचाररूपा भवितुमर्हति स्म सा भवतैवं निवारिताऽतो भवानेकमुत्तममवसरं निष्फलीकृतवान् " – इति निर्भर्त्स्य कार्यालयादेव तं निष्कासितवान् ।

*********

# निःस्वार्थः

एको बालकः कदाचित् पयोहिमापणं गतः ।

स वितारकं पृष्टवान् - " पयोहिमस्य बृहच्चषकस्य कियन्मूल्यम् ? "

वितारकेणोक्तं - " पञ्चदश रूप्यकाणि " ।

तदा स बालकः स्वीयकोषे स्थितं धनमगणयत् ।

ततः स पृष्टवान् - " तर्हि लघुचषकस्य कियन्मूल्यम् ? "

उत्तरं प्राप्तं - " द्वादश रूप्यकाणि " ।

" भवतु, लघुचषकमेकं ददातु " ।

वितारक आगत्य लघुचषकमेकं प्रदत्तवान्, बालकश्च द्वादश रूप्यकाणि दत्तवान् । ततस्तेन सानन्दं पयोहिमं खादितम् । ततः स आपणान्निर्गतश्चषकं मुक्त्वा । यदा वितारकस्तदुत्पीठिकायाः(table) सम्मार्जनार्थं गतस्तदा तेन ज्ञातं यल्लघुर्बालकोऽसौ त्रीणि रूप्यकाणि पारितोषिक(tip)रूपेण मुक्त्वा गत आसीत् । वितारकस्याऽक्षीण्यार्द्रे जाते ।

*********

कथा

# प्रारब्धात् पुरुषार्थो बलीयान्

- मुनिः भव्ययशविजयः
(डहेलावाला समुदायसत्कः)

एकस्मिन् ग्रामे कश्चन बालो वसति स्म। स एकदा कञ्चन ज्यौतिषिकं दृष्ट्वा तत्पार्श्वं गतवान्, स्वहस्तं दर्शयित्वा च पृष्टवान् - " महाराज ! मम हस्तं दृष्ट्वा वदतु भवान् यदहं कियत् पठिष्यामि ? " तदा स दैवज्ञस्तद्धस्तरेखा विलोक्य कथितवान् - " वत्स ! क्षाम्यतु माम्। विधात्रा तव हस्ते विद्यारेखैव नाऽङ्किताऽस्ति । तस्मादध्ययनं तव कृते दुःशकम् " । तदा मनागपि निराशोऽभूत्वा बालो ज्यौतिषिकसकाशाद् विद्यारेखायाः स्थानं हस्ते क्व भवतीति ज्ञात्वा स्वगृहं गतवान्।

ततो द्वितीयस्मिन् दिने च्छुरिकया स्वयमेव तत्स्थाने विद्यारेखामङ्कयित्वा पुनस्तस्य दैवज्ञस्य पार्श्वे समागतः, स्वीयं रक्तार्द्रं हस्तं दर्शयित्वा च विनम्रतयोक्तवान् - " महाराज ! पश्यत्वधुना, मम हस्ते विद्यारेखा विद्यते। अतो विश्वे काऽपि तादृशी शक्तिर्नास्ति या मां विद्यार्जनं कर्तु-मवरुन्ध्यात् " ।

बालकोऽयं स्वपुरुषार्थेन प्रारब्धमप्यन्यथा कर्तुं समर्थोऽस्ति, तेन च प्रारब्धं विरुध्य युद्धं घोषितमस्ति – इति तस्य तेजःपूर्णं मुखारविन्दमेव वददासीत्। ज्यौतिषिकस्तत्तेजसा पराभूत इव तं सम्यगभिनन्द्य साशीर्वादं विसृष्टवान्।

ततः स बालकः प्रचण्डपुरुषार्थेन विधातृलेखमपि मिथ्या कृत्वा संस्कृतभाषाया महान् वैयाकरणः **पाणिनि**रिति नाम्ना लोके प्रसिद्धिं प्राप।

यैरपि स्वजीवने साफल्यं प्राप्तं तैः कदाऽपि लघुपथो नैव गवेषितः, किन्तु स्वपरिश्रमेण सफलताया अमृतं पीतम्। उक्तं चाऽपि आङ्लकविना एमर्सनेन यत् –

यैर्जीवने सफलता प्राप्ताऽस्ति
ते सर्वेऽपि पुरुषार्थवादिन आसन्
ते कदाऽप्येवं नाऽकथयन् यद्-
भाग्ये यल्लिखितं तदेव भविष्यति – इति ।।

*****

कथा

# यस्त्यजति स श्रेष्ठः

- सा. तत्त्वार्थमालाश्रीः
(डहेलावाला समुदायसत्का)

स्वफलं त्यक्त्वा यथा वृक्षः, स्वधनं त्यक्त्वा यथा दानी, एवं स्वान्नं त्यक्त्वा यथा धरा श्रेष्ठा भवति, तथा नरोऽपि स्वमहत्त्वं त्यक्त्वैव श्रेष्ठो भवति । जीवनस्य प्रत्येकस्मिन् क्षेत्रे नरः स्वस्यैव महत्त्वं वर्धयितुमिच्छति । यत्र स्वमहत्त्वे हानिर्दृश्यते स्म तत्र स रुष्टो भवति । किन्तु वस्तुतो यदा स स्वमहत्त्वं गौणं कृत्वाऽपरं चाऽग्रे करोति तदैव स श्रेष्ठो भवति । अत्राऽर्थे दृष्टान्त एकः प्रस्तूयते –

एकदा देवेन्द्र दिवि देवपर्षदि घोषितवान् यद् - " दीपावलिकादिने द्योसभायां देवीपूजा भविष्यति । सर्वेषां कल्याणकारिण्या देव्यास्तद्दिने महादेवीत्वेन स्थापनां कृत्वा महोत्सवपूर्वकमभिषेकविधिः करिष्यते ।

देवेन्द्रवचनेन स्वर्गे आनन्दाश्चर्यावतनुताम् । उत्सवप्रिया देवा नूतनमहोत्सववार्तां श्रुत्वा प्रमुदिता अभवन् । परन्तु, महादेवीत्वेन कस्या देव्या अभिषेको भविष्यतीति देवेन्द्रेण स्पष्टतया नैव कथितमासीदतस्तद्विषये सर्वेषां देवानां महती जिज्ञासाऽऽसीत् ।

लक्ष्मीपतिः कुबेरोऽवदत् - " यदि दीपावलिकां महापर्वतयाऽऽचरितुमिच्छामस्तर्हि महादेवीतया लक्ष्मीदेव्येवाऽभिषिक्ता भवतु । सा खलु सर्वसुखदात्र्यस्ति । प्रसन्नीकृतया तया सर्वे जीवाः प्रसन्नाः सुखिनश्च भविष्यन्ति " इति ।

चन्द्रदेवोऽपि तस्मै समर्थनमदात् । सोऽकथयत् - " सर्वथा सत्यम् । लक्ष्मीपूजामेव कुर्याम । दुःख-दारिद्र्यापहर्त्री देव्येव महादेवीत्वेन पूज्या । तयैव सर्वजनानां सुखं भविष्यती " ।

तदा वरुणदेवोऽप्यवोचत् - " लक्ष्मीपूजनं हि सर्वश्रेष्ठपूजनमस्ति । यदि ततो विपरीतं करिष्यते तदा भयावहः परिणामः प्राप्स्यते " ।

अथ तदा इतरपक्षे, सप्तर्षयो, गन्धर्वाः, किन्नरा, देवगुरुर्बृहस्पतिश्चैवं कथयन्ति स्म यत् – " महादेवीत्वेन सरस्वतीदेव्येव योग्या, सेव चाऽभिषिक्ता भवतु " । गन्धर्वराजाऽपि तेभ्यः समर्थनमदात् ।

विद्याधरोऽपि कथितवान् - " विद्याया देवी महती, यतो विद्या हि तृतीयं लोचनम् । ज्ञानरुचि-संस्काराणां दात्री माता सरस्वती हि पूज्या " । तदा देवगुरुर्बृहस्पतिस्तानकथयत् - " अवश्यम् । सा खल्वान्तरचेतनां जागरयति, ज्ञान-विज्ञाने वर्धयति । अथैनां श्वेतवस्त्रधारिणीं मातरं सरस्वतीमेव पूजयिष्यामः, तदर्थं चाऽस्माकं सर्वां शक्तिं प्रयोजयिष्यामः " ।

तदा विद्याधरोऽब्रवीत् - " भवानिदमिन्द्राय कथयतु । स कदाऽपि भवतो वचनं नैवोल्लङ्घयति " ।

तच्छ्रुत्वा बृहस्पतिरिन्द्रसमीपमगच्छत् । किन्तु कुबेरः पूर्वमेव तत्राऽऽगत आसीत् । तद्गमनानन्तरं बृहस्पतिरवदत् - " इमे देवा भवन्तं कुमार्गे प्रेरयन्ति । अस्माभिस्तु सर्वशास्त्रज्ञा वाग्देव्येव खलु पूजयितव्या । शास्त्राज्ञाऽपीदृश्येवाऽस्ति । अतोऽधुनैव भवानिमामां घोषणां कारयतु – इति मे आज्ञाऽस्ति " ।

इन्द्रस्तु महाप्रयत्नैर्बृहस्पतिं समन्वजानात् - " भवान् निश्चिन्तस्तिष्ठतु, अहं कथमपि सरस्वतीमेव पुरस्करिष्ये " । परं सोऽपि व्यामोहं प्राप्तवान् यत् - " किमत्र कर्तव्यम् ? "

एवं च देवलोके द्वौ पक्षौ बभूवतुः । एकस्मिन् पक्षे लक्ष्मीपूजनस्य समर्थनमासीत्, अन्यत्र च सरस्वतीपूजनस्य । कस्यचिदेकस्य पक्षस्य समर्थनेनाऽन्यः क्रुद्धो भवेत् । स्थितिर्गभीरा जाताऽऽसीत् । यथा यथा दीपालिकापर्व निकटमभवत् तथा तथा परिस्थितिर्विकटा जाता ।

अत इन्द्रो विष्णुसमीपं गत्वा सर्वं कथितवान् विज्ञप्तवांश्च - " प्रभो ! रक्षतु मां कृपया " । तन्निशम्य विष्णुरहसत् । स ब्रह्मणे महादेवाय चेदं ज्ञापितवान् । ते त्रयोऽपि मिलित्वेन्द्रमकथयन् - " चिन्तां परिहरतु । स्वर्गे घोषणं करोतु यद् – दीपालिकादिने त्रयेऽपि भगवन्तः सम्मील्य देवीपूजां करिष्यन्ति - इति । कस्या देव्याः पूजनमस्तीत्यपि तदैव ज्ञास्यते " ।

अथ दीपालिकादिनमागतम् । सर्वे देवा उत्सुका अभवन् । निश्चिते समये सर्वेऽपि पर्षदि मीलिताः । लक्ष्मी सरस्वती चाऽपि तत्राऽऽगते । त्रयेऽपि भगवन्तः समागताः । सर्वे परिणामं जिज्ञासन्तः स्थिताः ।

स्वस्थाने उपविश्य विष्णुरवदत् - " अद्य वयं महादेव्या अभिषेकं कर्तुमुपस्थिताः स्मः । या देवी श्रेष्ठाऽस्ति तां वयं महादेवीत्वेन पूजयिष्यामः । अथ वदन्तु सर्वे देवाः ! का वा देवी सर्वश्रेष्ठा ? लक्ष्मी उत सरस्वती ? सर्वे देवा शान्तचित्तेन विचार्योत्तरं ददतु " ।

तदा लक्ष्मीदेवी समुत्थाय न्यवेदय् - " भगवन् ! सरस्वती देव्येव श्रेष्ठाऽस्ति । यथाऽऽत्मना विना शरीरं तथा ज्ञानेन विना लक्ष्मीः । अहं देवीं शारदां वन्दे । श्रूयतेऽपि च लोके यथा –

विद्वत्त्वं च नृपत्वं च, नेव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

अतः सैव महादेवत्वेन पूजनीयाऽस्ति ।

श्रुत्वैतत् सरस्वतीदेव्यपि झटित्युत्थाय कथितवती - " ममाऽपि कथनं श्रूयताम् । एवमनुचितं मा कार्षुः । अहं भवद्भ्यः प्रार्थये यल्लक्ष्मीं विना ज्ञानमपि निरर्थकं भवेत् । उदरभरणादि-कार्याण्यकृत्वा कोऽपि शास्त्राणि पठितुं रचयितुं वा समर्थो नास्ति । पठ्यते चाऽपि -

आरोग्यं प्रथमं द्वितीयकमिदं लक्ष्मी तृतीयं यशः ।
तुर्यं स्त्री पतिचित्तगा च विनयी पुत्रस्तथा पञ्चमम् ।।

अतो लक्ष्मीदेव्येव महादेवीत्वेन पूज्याः " ।

द्वयोरपि देव्योः कथनं श्रुत्वा मत्सरं वहन्तः सर्वे देवा लज्जिताः ।

ततस्तान् वीक्ष्य विष्णुरवदत् - " भो देवाः ! समृद्धिर्ज्ञानं च सहैव सञ्चलतः । एकं वामचरणं द्वितीयं तु दक्षिणचरणमस्ति । यदि लक्ष्मी देहमस्ति तदा सरस्वती त्वात्माऽस्ति । एकाक्यात्मा विकलो भवति । तथा एकाकी देहोऽपि जडोऽस्ति । एतस्मात् कारणान्नैकाकिनी लक्ष्मीदेवी न वैकाकिनी सरस्वती देवी श्रेष्ठा, परन्तूभये अपि देव्यौ सम्मीलिते श्रेष्ठे स्तः ।

सर्वे देवा विष्णुदेवं समार्थयन्त । स्वकथनमनुवर्तयता तेन कथितं - " या श्रेष्ठा सा पूज्या, अतो वदन्तु सर्वे ! का वा श्रेष्ठा देवी ? यस्त्यजति स श्रेष्ठो भवति । जीवनस्य महत्तमेष्वसरेष्वपि यस्त्यजति स श्रेष्ठतमः । अतो लक्ष्मीदेवी सरस्वतीदेवी चेत्युभये अपि श्रेष्ठतमे स्तः । यतोऽस्मिन् महत्त्वपूर्णेऽवसरेऽपि ते स्वीयं महत्त्वं गौणं कृत्वाऽपरां अग्रेऽकुरुताम् । अतो वयं प्रतिवर्षं दीपावलिकामहापर्वणि लक्ष्म्याः सरस्वत्याश्चेत्युभयोरपि देव्योः पूजनं करिष्यामः " । विष्णोर्वाणीमिमां श्रुत्वा सर्वे देवाः प्रमुदिता बभूवुः सर्वे च सम्मील्य दीपावलिकामहोत्सवं चक्रुः ।

बुधाः कथयन्ति यत् - कदाऽपि महत्त्वं न याच्यं परं सर्वदाऽन्यस्मै तद्देयम् । एतदेवाऽस्मभ्यमपि महत्त्वं दास्यति । प्रसिद्धं चैतद् –

याचमानजनमानसवृत्तेः, पूरणाय न बत यस्य न जन्म ।
तेन भूमिरतिभारवतीयं, न द्रुमैर्न गिरिभिर्न समुद्रैः ।।

*********

# मर्म नर्म

- कल्याणकीर्तिविजयः

**रमणी** पुस्तकालयस्यैकस्मात् सामयिकादहं खाद्यस्याऽस्य सज्जीकरणप्रक्रियायाः पत्रमिदं कर्तयित्वाऽऽनीतवत्यस्मि ।

**रमणः** शोभनं जातम् । एतेनाऽन्ये बहवः पतयस्त्रासाद् रक्षिता भविष्यन्ति !!

*********

(चित्रप्रदर्शने)

**महिला** अहो ! अद्भुतान्येतानि चित्राणि ! अद्भुताश्चैते वर्णाः ! वरमभविष्यद् यदि नामाऽहं वर्णानेतान् मया सहाऽनेष्यम् !

**चित्रकारः** अवश्यं नेष्यति भवती वर्णान् ! यतो भवती मे वर्णपात्रोपर्येव समुपविष्टाऽस्ति !!

*********

**सुहृत्-१** (खल्वाटं मित्रं) भवतः शैशवकालीनः कश्चिदभिलाषः पूर्णो जातो वा ?

**सुहृत्-२** आम् । बाल्ये पिता मां केशैर्धृत्वा यदा ताडयति स्म, तदा बहुशो मया प्रार्थितमासीद् यत् – मस्तके यदि केशाः न स्युस्तदा वरम् । अद्य केशाः न सन्ति !!

*********

**सङ्गीतज्ञः** वदतु भगिनि ! कं वा रागं श्रावयेयम् ?

**महिला** यं कमपि रागं श्रावयितुमर्हति भवान् । अहं तु मे पतिं विकलं दुःखिनं च द्रष्टुमिच्छामि !!

*********

(रेल्-याने)

**चिटिका-परीक्षकः** (प्रवासिनं सन्न्यासिनं) चिटिकां दर्शयतु कृपया।

**सन्न्यासी** अहं रामजन्मभूमिं प्रति प्रस्थितोऽस्मि । तत्र चिटिकाया का वाऽऽवश्यकता ?

**चिटिका-परीक्षकः** एवं वा ? तर्हि प्रथमं कृष्णजन्मभूमिं पश्यतु, ततो रामजन्मभूमिम् !!

*********

**मगनः** अये ! भवान् ईदृशं स्थूलकाचयुतमुपनेत्रं धारयन्नुलूक इव दृश्यते।

**छगनः** यद्यहं तादृशमुपनेत्रं न धारयेयं, तदा भवानपि मयोलूक इव दृश्येत !!

*********

(उपाहारगृहे चाय-पेये मक्षिकां दृष्ट्वा)

**ग्राहकः** (कोपेन) मया केवलं चाय-पेयमेव समादिष्टं न तु मक्षिका।

**वितारकः** सत्यम्। परं मक्षिकाया कृते पृथङ् न किमपि मूल्यं दातव्यम् !!

*********

**शिक्षकः** केनचिन्मे उपनेत्रं दृष्टं वा ?

**माणवकः** आम् ! आरोहण्यां पतितं मया तद् दृष्टम्।

**शिक्षकः** तर्हि किमर्थमानीय मे न प्रदत्तम् ?

**माणवकः** तदुपरि मत्पादपतनानन्तरं भवतोऽनुपयोगि तदिति मत्वा नैवाऽऽनीतम् !!

*********

प्राकृतविभागः

# पंचपरमिट्ठिथुत्तं

(उवसग्गहर-थुत्त-पायपुत्तिरूवं)

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरिः

पणमामि तमरिहंतं, पसमियपच्चूहवूहदुट्ठत्तं।
सिवपयपरमुल्लासं, मंगलकल्लाणआवासं ॥१

हुज्जउ सिद्धा सरणं, जेहि विणासियमणंतगइमरणं।
जेसिं झाणा कामं, दुट्ठजरा जंति उवसामं ॥२

आयरियाणं पाए, पडेमि आयारसुद्धिमिच्छंतो।
जमणुसरिया सच्चं, पावंति न दुक्खदोगच्चं ॥३

झाएमि उवज्झाए, जे संसत्ता सयावि सज्झाए।
जंते जओ अनिदाणं, जीवा अयरामरं ठाणं ॥४

जइ अहिलसह मुणित्तं, तइ भे सुणह रमणिज्जमिगचित्तं।
हियये धरह अमंदं, भवे भवे पासजिणचंदं ॥५

*********

प्राकृतविभागः

# सिरिसंतिजिण-थुत्तं

(संतिकर-थुत्त-पायपुत्तिरूवं, संस्कृत-प्राकृतमिश्रभाषीयं)

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरिः

वन्देऽर्हन्तं शान्तिं, जयसिरिजुत्तं विदलियभावारिं।
लोकत्रितयालोकं, निव्वाणी-गरुडकयसेवं ॥१

जगति त्रिभुवननाथे, घाइयघाइयअघाइकम्मंसे।
विश्वपदार्थादर्शं, सव्वासिवदुरियहरणाणं ॥२

वितरति भगवन्! मधुरं, अरिपत्ताणं पि सासयं सोक्खं।
नैतच्चित्रकरं सहि-पत्ताणं च देइ सिरिं ॥३

जिन! ते वचनविलासा, अमय-रसंका ससंक-संकासा।
सम्यग्दर्शन शुद्धान्, सया वि रक्खंतु जिणभत्ते ॥४

केषां रक्षति नाऽलं, तुह चलण-कमलदल-कल-भसलाणं।
देवीनां त्रितयीयं, नरदत्ता कालि-महकाली ॥५

स्वामिँस्तव वरशासन-रक्खण-तप्पर-हियय-विलसिआओ।
गणयन्ति न किमपि कमपि, महमाणसिआ उ देवीओ ॥६

प्रणमति यस्तव पादौ, स हवइ निस्संकसिद्धिपहपहिओ।
अथवा विनयविशिष्टो, बंभो मणुओ सुरकुमारो ॥७

अचिरात्मजाभिधानं, जो पढइ अविरयममल-परिणामो।
सोच्चैः पदमधिगच्छति, गोमेहो पास मायंगो ॥८

दारिद्र्य-दुःख-दूनाः, खणमवि समरंति तुज्झ जिण ! णामं।
जायंते गतदुरिताः, सुतारय-सोय सिरिवच्छा ॥९

अर्हन्निदमेकान्तं, तुह तूहरया सया वि समुयारा।
परमाः परोपकारा, अंब-पउमावई सिद्धा ॥१०

भीमे भवकंतारे, असरणसरणा उ तुह अमयबोहा।
पुण्यप्रतिपन्नानां, कुणंतु रक्खं सया अम्हं ॥११

जयतु जयतु परमात्मन् !, विद्धंसियसयलदोसगणगरिमा।
चिरमचिरातनुजन्मा, मुणिसुंदरसूरिथुअमहिमा ॥१२

यः संस्तौति जिनेशं, किलेसमुत्तं धुरंधरवरेसं।
श्रद्धापुलकितहृदयः, स लहइ सुहसंपयं परमं ॥१३

॥ इति **सिरिसंतिजिणथुत्तं** ॥

*********

प्राकृतविभागः

# आयरिया
# सिरि उदयसूरिणो

- सा.हेमपूर्णाश्रीः
(शासनसम्राट्-समुदायसत्का)

विक्कमे १९४४ तमे वरिसे **सिरिथंभतित्थ**नयरंमि **छोटालाल**नामगस्स सावगस्स गिहे **परसन**-नामिगाए साविगाए कुच्छीओ **उजमसी**-णामो पुत्तो जाओ। सो य बालत्तणाओ चेव अईव तेयंसी बुद्धिमंतो य आसी। अह विक्कमे १९५४तमे वरिसे मुणिवरा **सिरिणेमिविजया**(आयरिया **सिरिणेमिसूरीसरा**) **थंभतित्थे** समागया। तेसिं पासंमि उजमसी पढिउं जाइ। मुणिवरेहि उण जंगमपाढसाला पारद्धा अहेसि। तीए पाढसालाए वि उजमसी विज्जत्थी जाओ सम्मं च पढइ। णवरं तेण सोलसवरिसवयंमि अट्ठसहससिलोयप्पमाणं **चन्दप्पहा**वायरणं भणियं। तओ सो तंमि लहुंमि वयंमि चेव साहु-साहुणीणं पाढेउमारद्धो।

विक्कमे १९६२तमे वरिसे अट्ठारसवरिसवयंसि तेण मायरतित्थसमीवट्ठिए देवागामंमि सिरिनेमिविजयगुरुहत्थेणं दिक्खा गहिआ।-तस्स णामं **उदयविजओ** त्ति ठवियं। सिरिउदयविजएण दिक्खागहणाणंतरं केवलंमेगदिणंमि पक्खियसुत्तं हिययत्थं कयं, तहा वरिसत्तय-पज्जाए आवस्सयसुत्तं हरभद्दसूरिकयवित्तिसहियं सयमेव पढियं। सव्वमेयं तेण गुरुभत्तीप्पहावेणं पावियाए गुरुकिवाए फलं। तस्स बहुसुयत्तण-निम्मलचारित्तपालण-गुरुभत्ति-मिच्चाइणो गुणे पेक्खिऊण गुरूहिं सो आयरियपएण समलंकिओ आसि।

संपइकाले जाइं वि सिद्धचक्कपूयण-नंदावत्तपूयण-अरिहंतमहापूयण-अंजणसलाया-पाणपइट्ठा-संतिण्हायमिच्चाईणि सव्वत्थ पवट्टंति ताइं सव्वाइं सिरिउदयसूरीसरेण चेव संसोहियाइं संपाइयाइं पयासियाइं च सव्वपढमत्तणेण।

सरलत्तणं, सहणसीलया, संती, उयारसहावो, निच्चं सज्झायकरणं, गुरूणं पुण्णहियएण निच्चं भत्तिकरणं इच्चाईणो तेसिं असंखिज्जा गुणा संति जे अम्हारिसेहिं णाउं पि ण सक्का। तवं पि तेहिं

णिच्चं णेमित्तियं च बहुं समायरियं, जहा – वरिसाणि जाव पइमासं सो दससु वि पव्वतिहीसुं सया उववासं काहीअ। अण्णे वि तेहिं बहुणो तवा तविया णियजीवणंमि।

जहा सिरिमहावीरसामिणो मुहकमलंमि णिच्चं गोयमसामिणो णामं अहेसि तह चेव आयरियाणं सिरिणेमिसूरीसराणं मुहकमले तेसिं चेव णामं आसि।

तेसिं बहुसुयत्तणं गीयत्थत्तणं संजमपालणं च एत्थ कलिकाले पुव्वमहरिसिसरिसं उक्किट्ठं आसि। अंतिमंमि काले तेसिं चक्खुवियलत्तणं आसि तह वि ते सव्वया पसण्णचित्ता सज्झाय-ज्झाणतप्परा समाहियहियया य अहेसि। तेहिं कयाइ वि एयंमि अट्ठे अट्टज्झाणं णेव कयं। तओ अईव सोहणं संजमपालणं काउं – मे संसारो लहू होज्ज – त्ति भावणं भावेंता गीयत्थसिरोमणिणो सिरिउदयसूरीसरा विक्कमस्स २०२६तमे वरिसे वइसाह-किण्हपक्खस्स एगारसीदिणे भावणयर-णयरंमि समाहिमरणेणं कालं किच्चा देवलोयवासिणो जाया।

जह तेसिं जीवणं निम्मलं गुणगणभरियं च आसि तहा अम्हाणं पि जीवणं हवेज्ज त्ति तेसिं समीवे पत्थणं काउं विरमामि।

*********

**शब्दपूरण्या उत्तराणि**

**वामतः दक्षिणम्**

२. वालुका, ५. दानवारि, ६. रतिपति, ९. जक्षणं, ५. रीति, ११. यमः, १२. लक्ष्मणः, १३. मृगया, १४. काक, १६. तिल, १८. तनय, २०. कूपयन्त्र, २१. मनोरम, २२. कमलम्॥

**उपरिष्टादधः**

१. गोदावरी, २. वारिज, ३. कारणं, ४. मतिभ्रमः, ८. क्षतः, १०. तिलक, ११. ययाति, १४. कालकूटं, १५. वन, १७. ललामकं, १८. तन्त्रक, १९. यमलम्॥

प्राकृतविभागः

# पाइयविन्नाणकहा

- आ.श्रीविजयकस्तूरसूरिः

## (१)

## थोवेण निमित्तेण बुज्झमाणसणंतकुमारचक्किणो कहा

थोवेण वि निमित्तेणं, बुज्झंति केइ सन्नरा।
**सणंतचक्कवट्टिस्स**, इहोदाहरणं जहा ॥१॥

**गयपुर**नयरंमि **सणंतकुमारो** चक्कवट्टी महाराया होत्था। सो अईव रूववंतो छक्खंड-भरहरज्जं पसासेइ। एगया सोहम्मसहाए सक्को देविंदो सणंतकुमारचक्कवट्टिणो रूवं बहु सिलाहित्था, वुत्तं च तेण - " एएण समो अन्नो को वि भूयलंमि रूववंतो नत्थि "। तओ इंदवयणं असद्दहंता दुवे **विजय-विजयंत**देवा तक्कोऊहलावलोयणट्ठं माहणरूवा होऊणं गयपुरनयरं समागया।

एयंमि समए सिणाणकरणवेलाए आसणसंठिअं आभूसणरहियं सुगंधितेल्लेण संलित्तंगं सणंतकुमारं दट्ठूणं तयईवरूवविमोहिया ते मुहुं मुहुं सिराइं धूणिउं लग्गा। चक्किणा पुट्ठं - " किमट्ठं सिराइ धूणेह ? "। तेहिं वुत्तं - " देव ! जारिसं भवंतरूवदंसणे कोउयं सुणियं तारिसमेव रूवं अम्हेहिं दिट्ठं "। इअ माहणवयणं सोच्चा अइरूवगव्विओ चक्कवट्टी आह - " भो भो विप्पा ! अहुणा एयाए अवत्थाए मईयं रूवं किं विलोइज्जइ ? जइ रूवविलोयणाहिलासो होज्जा, तइया सिणाणकरणाणंतरं परिहियमहग्घनेवत्थस्स धरियालंकारस्स सिरंसि धरियछत्तस्स,चामरेहिं वीइज्जमाणस्स, बत्तीसरायवरसहस्सेहिं सेविज्जमाणस्स, मम रूवं विलोयणिज्जं " ति। चक्कि-वयणं सुणित्ता तेहिं चिंतियं - " अहो ! उत्तमस्स नियमुहेण निययपसंसं काउं न जुंजिज्जइ। जह परेहिं गहिया नराणं गुणा सोक्खसोहग्गदायगा हवंति, न तहा सयं गहिया। अओ बुहा निए गुणे न पसंसिरे "। तओ ते माहणा चक्कवट्टिणो वयणं पमाणीकाऊणं गया।

तओ चक्कवट्टिंमि सहाए उवविट्ठंमि पुणो वि ते समागया। तइया रूवं विलोइऊणं विसन्ना जाया। चक्किणा वुत्तं - " किं विसायकारणं ? "। ते वयासी - " संसारविलसियं "। चक्की आह - " कहं ? "। तेहिं वुत्तं - " जं भवओ पुव्वं रूवं दिट्ठं, तओ अणंतगुणहीणं एण्हिं तुव रूवं वट्टेइ "। चक्किणा वुत्तं - " कहं एयं जाणेह ? "। ते आहु - " ओहिनाणेण " त्ति।

चक्किणा साहियं - " तहिं किं पमाणं ? " । ते वयासी - " भो चक्कि ! मुहत्थियं तंबूलरसं भूमीए थुक्किय विलोयसु, जइ मक्खियाओ तदुवरि ठाऊणं मरणं पावंति तइया अणेण अणुमाणेण जाणेहि तुम्ह सरीरं विसमइयं जायं ति, सत्त महारोगा तुव देहंमि समुप्पन्ना " । इय देववयणं सोच्चा चक्की चिंतेइ - " अणिच्चो एसो देहो, एयंमि असारे देहंमि किं पि सारं नत्थि " । वुत्तं च -

**अणिच्चाइं सरीराइं, विहवो नेव सासओ ।**
**निच्चं संनिहिओ मच्चू, कायव्वो धम्मसंगहो ।।**
**दाणं दरिद्दस्स पहुस्स खंती, इच्छानिरोहो य सुहोइयस्स ।**
**तारुण्णए इंदियनिग्गहो य, चत्तारि एयाइं सुदुक्कराइं ।।**

इअ वियारंतेणं वेरग्गपरायणेण रज्जसिरिं चइत्ता संजमसिरी गहिया । भुजंगमो कंचुयं पिव पच्छा अणुसारीणि नियरिद्धिं न विलोएइ । **सुणंदाईणं** इत्थीणं विलावे सुणंतो वि मणयं पि न चलित्था सो । छम्मासिं जाव निहिणो रयणाइं सेवगा य सिणेहाइरेएण पिट्ठंमि लग्गा, किं तु तेण पच्छा वि न विलोइयं । छट्ठभत्तस्स अंते सएव पारणं विहेइ । पारणए वि सव्वं विगइं चइऊणं रोगक्कंतदेहो निम्ममो मायारहिओ अपडिबंधो भूमीए विहरित्था ।

एयंमि समये पुणरवि सोहम्मिंदेण वुत्तं - " अहो ! धण्णो एसो सणंतकुमारो मुणी, महया रोगेण दूमिज्जमाणो वि देहचिइच्छं न कुणेइ, धण्णो इमो " त्ति इंदवयणं सुणिअ असद्दहंता ते चेव दुवे देवा वेज्जरूवं विहेऊणं तहिं आगया । सणंतकुमारमुणिणो समीवं गंतूणं वयासी - " भो मुणे ! तुव सरीरं रोगजज्जरं अईव पीलिज्जमाणं दीसइ । अम्हे वेज्जा अत्थि । जइ तुव आणा सिया तया रोग-पडीगारं कुणेमो " । मुणिणा वुत्तं - " अणिच्चस्स देहस्स को पडिगारो ? भवंताणं देहरोगावणयणे सत्ती न उ कम्मरोगहरणे । तारिसी खु सत्ती मज्झ वि अत्थि " - इअ वोत्तूणं अंगुलिया थुक्कएणं घंसिया सा सुवण्णमइया जाया । " एयारिसी सत्ती ममाऽवि वट्टइ, परन्तु एयाए का सिद्धी ? जाव कम्मरोगाणं खओ न जाओ ताव देहरोगक्खएण किं ? अओ मम रोगपडीगारेण किं पि पयोयणं नत्थि " ।

एवं सुणिऊणं ते सुरा पत्तविम्हया मुणिं वंदिऊणं नियसरूवं निवेइऊणं सग्गं गया । सणंतकुमारो वि महरिसी वरिसाणं सत्तसइं जाव सत्त महारोगे अणुभविऊणं समभावेण वरिसाणं एगं लक्खं जाव निरइयारं चारित्तं पालिऊणं सम्मेयसेलसिहरं गओ, तत्थ सिलायले अणसणं काऊणं मासिएण भत्तेणं कालगओ समाणो एगावयारभावेण तइयंमि सग्गंमि समुप्पण्णो । तओ अणंतरं चइऊणं महाविदेहंमि सिद्धिं पाविहिइ । उवएसो - **सणंतचक्किणो वुत्तं, खणियभावदंसगं ।**
**सोच्चा विणस्सरे देहे, ममत्तं चय सव्वहा ।।**

**- उवएसमालाए**

**थोवेण निमित्तेणं बुज्झमाणसणंतकुमारचक्किणो कहा समत्ता ।।**

## (२)

## भावणाविसुद्धीए सिरिउसहजिणीसरजणणीमरुदेवाए कहा

तवसंजमगुणरहिया, भव्वा सिज्झन्ति केइ भावेण।
एत्थ जहा लहुकम्मा, **मरुदेवी** भगवई सिद्धा॥

जइया **सिरिउसहदेवेण** चरित्तं गहियं तइया **भरहो** चक्कवट्टी महाराया होत्था। सामिणी सिरिउसहनाहजणणी **मरुदेवा** पइदिणं भरहं उवालंभित्था - " हे वच्छ ! तुं रज्जसुहमोहिओ मईयपुत्तस्स सुद्धिं पि न विहेसि। अहं लोगमुहाओ एवं सुणेमि - मम पुत्तो उसहो एगं वरिसं जाव अन्नं जलं च विणा बुहुक्खिओ पिवासिओ, वत्थं विणा एगागी वणंमि वियरंतो अत्थि, सीय-तावाइयं सहन्तो महादुक्खं अणुभवेइ। एगवारं तं ममकेरं पुत्तं इहयं आणेहि, तस्स भोयणाइयं समप्पेमि, पुत्तमुहं च विलोएमि "।

तइया भरहेण वुत्तं - " मायर ! मा सोगं कुणेसु, अम्हे सयसंखा रिसहेसरपुत्ता सव्वे वि तुवच्चिय पुत्ता हवेमो "। मरुदेवीए कहियं - " तं सच्चं, परन्तु अंबफलाभिलासिणो किं अंबलिगाफलेण ? तं उसहं पुत्तं विणा सव्वो वि एस संसारो मम उ सुन्नो चिय "।

एवं पइदिणं उवालंभं दिंतीए पुत्तविओगाओ अ अणिसं रोयणं कुणंतीए तीए नेत्ताणं पडलाइं वलियाइं। इओ सहस्ससंखेसुं वरिसेसुं गएसुं उसहसामिणो केवलनाणं समुप्पन्नं। चउसट्ठिसुरिंदेहिं समागम्म समवसरणं रइयं। भरहस्स उज्जाणपालेण वड्ढावणिया दिण्णा। भरहो वि समागंतूणं मरुदेवाए सिरिउसहदेवसरूवं साहित्था - " तुं मम पइदिणं उवालंभं देसि, जं - मज्झ अंगओ सीयायवाइपीलं अणुभवेइ, एगागी वणंमि य वियरेइ त्ति। तओ अज्ज आगच्छसु मए सद्धिं। तव पुत्तस्स महिड्ढिं दावेमि "। इअ वयणसवणेण सोक्कंठं पियामहिं हत्थिखंधंमि ठविऊणं सो समोसरणं समागच्छित्था।

तहिं देवदुंदुहिनिणायं सोच्चा मरुदेवी अईव हरिसवई संजाया । देवदेवीणं जयजयसद्दं सुणिऊणं तीए रोमुग्गमो संजाओ, नयणाहिंतो अ हरिसंसूइं निग्गयाइं। तव्वसेणं अच्छिगयतिमिररोगे अवगए तीए सव्वंपि पागारतिग-असोगच्छत्तचामराइसरूवं दिट्ठं। अणुवमं पाडिहेराइयमहिड्ढिं दट्ठूणं मणंसि मरुदेवी एवं वियारित्था - " धिरत्थु इमं संसारं, धिद्धी मोहं। अहं एवं वियाणियवई, जं - मम णंदणो एगागी वणंमि बुहुक्खिओ पिवासिओ परिभंमतो होही। परं इमो एयावंतिं इड्ढिं पत्तो वि कया वि मम संदेसयं पि न पेसित्था। अहं तु पइदिणं नंदणमोहेण अईव दुक्खिआ संजाया। तओ धिगत्थु कारिमं एगपाक्खियं सिणेहं। को पुत्तो ? का माया ? सव्वो वि इमो जणो नियत्थसाहणरसिगो। न को

वि कास वि वल्लहो " । इअ चिंतमाणी भावविसुद्धीए घाइकम्मक्खएण केवलनाणं आसज्ज अंतमुहूत्तंमि खीणाउसा सा मोक्खे अव्वाबाहं सुहं पत्ता ।

एयाए ओसप्पिणीए अच्चंतथावरा एसा पढमसिद्ध त्ति साहिऊणं तीए सरीरं देवेहिं खीरसमुद्दे खित्तं ।

अणेण केई एवं वोत्तूणं - " तवसंजमाइविहाणं विणा जह मरुदेवा सिद्धा तहा अम्हे वि मोक्खं गच्छिस्सामो " त्ति आलंबणं गिण्हंति । एयमालंबणं विवेगिहिं न गेज्झं, जओ सा अच्चंतथावरा कया वि अपत्ततसभवा अबद्धतिव्वकम्मा अच्चंतलहुकम्मा आसि । तओ केवलविसुद्धभावणाए सिद्धा । अणंतजीवेसु मोक्खं गएसु एरिसो जीवो एगुच्चिय वियाणियव्वो ।

उवएसो -

**मरुदेवाए नायं, संसारासारभावदंसणयं ।**
**नच्चा भविया तुम्हे धरेह चित्ते सया एवं ।।** **-उवएसमालाए**

**भावविसुद्धीए सिरिउसहजिणीसरजणणीमरुदेवाए कहा समत्ता ।।**

*****

## (३)

## रज्जलोहेण पुत्ताणं पि विडंबणाविहायगस्स कणयकेउनरिंदस्स कहा

रज्जे मूढो जीवो, छिंदइ पुत्ताण अंगुवंगाई ।
इह **कणयकेउ**नरवइ-नियंसणं बोहदाणट्ठं ।।

**तेयलिपुरंमि** **कणयकेऊ** नाम नरवई होत्था । तस्स **पउमावई** नाम पट्टदेवी आसी । तस्स **तेयलिपुत्त**नामो मंती, तस्स **पोट्टिला** नाम पिया अहेसि, सा अईव वल्लहा अत्थि ।

अह रज्जसुहं भुंजमाणस्स कणयकेउस्स पुत्तो जाओ, तया राया चिंतेइ - " इमो पुत्तो वड्ढंतो समाणो मईयं रज्जं गिहिस्सइ " - त्ति भएण सो तस्स हत्थच्छेयं कासी । कमेण बीओ पुत्तो उप्पण्णो । तस्स वि पायच्छेयं विहेइ । एयाए रीईए कासई अंगुलिच्छेयं, कस्सइ नक्कच्छेयं, कस्सइ कासइ कण्ण-च्छेयं नयणच्छेयं च सो नरिंदो कासी । एवं सव्वे वि पुत्ता तेण खंडियंगा रज्जाहिगार-रहिया कया ।

एवं बहुकालंमि गए पुणो वि पउमावई देवी सुहसुमिणसूइअं गब्भं धरित्था । तइया मंतिभज्जाए पोट्टिलाए वि गब्भो धरिओ । तइया मंतिं आगारिऊणं पउमावईदेवीए साहियं - " मए

सुहसुमिणसूइओ गब्भो धरिओ अत्थि। अओ जम्मसमए सो भवया पच्छन्नभावेण पालणीओ, जहा सो रज्जाहिगारी होज्जा। भवओ वि सो सहेज्जगरो होहिइ " - त्ति सुणिऊण तीए वयणं मंतिणा वि पडिवन्नं। समए देवीए पुत्तो जाओ। पच्छन्नवित्तीए मंतिणा सो नियभज्जापोट्टिलाए समप्पिओ। तयवसरे पोट्टिलापसूया पुत्ती पउमावईए देवीए समप्पिआ। पच्छा दासीए निवस्स पुत्तीजम्मसरूवं वियाणावियं।

अह मंतिगेहंमि वुड्ढिं पावंतस्स रायकुमारस्स **कणयज्झउ** त्ति नामं दिण्णं, कमेण सो जोव्वणं पत्तो। तयम्मि समए कणयकेउनरिंदो परलोगं गओ। तया सव्वे वि सामंतपमुहा चिंताउला जाया एवं - " रज्जं कास समप्पिस्सामु ? " त्ति। तयवसरे मंतिणा तेयलिपुत्तेण सव्वं पि पउमावईदेवीसरूवं निरूविअं। तइया कणयज्झयं रायनंदणं णच्चा सव्वे वि पहिट्ठा संजाया। सव्वेहिं पि महयाडंबरेण सो कणयज्झयकुमारो रज्जम्मि ठविओ। कणयज्झयनरिंदेण मंतिं महुवगारिणं वियाणिऊणं अईव तस्स सम्माणं दिण्णं। महया आणंदेण रज्जं पालेमाणस्स तस्स कियंतो कालो गओ। एगया मंतिणो गेहमि पोट्टिला पिया पुव्वं पाणेहिंतो वि अहिगा वि केणई कम्मदोसेणं अणिट्ठा जाया। भिन्नसेज्जा कया। पोट्टिलाए मणंसि एयं महादुक्खं उप्पन्नं।

वुत्तं च - **आणाभंगो नरिंदाणं, गुरूणं माणमद्दणं।**
**भिन्नसेज्जा य नारीणं, असत्थवहमुच्चइ॥**

पियावमाणदुहियाए तीए विसेसेण दाणाइधम्मकिच्चं पारद्धं। एगया पोट्टिलाघरंमि एगा सुव्वया साहुणी आहारट्ठं समागया। संमुहं गंतूणं सुद्धाहारेणं पडिलाहिऊणं पंजलिं काऊणं पोट्टिलाए वुत्तं - " भो भगवइ ! तारिसं किं पि विहेहि, जेण मम पिओ वसीहोज्जा। परुवयारो चिय परमं पुण्णं " जओ वुत्तं -

**दो पुरिसे धरइ धरा, अहवा दोहिंपि धारिया धरणी।**
**उवयारे जस्स मई, उवयारो जं न वीसरइ॥**

इअ पोट्टिलावयणं सुच्चा सुव्वया साहुणी साहेइ - " तुमए किं वुत्तं ? एयारिसी पउत्ती उत्तममहिलाणं न जुत्ता, जओ मंततंताईहिं भत्तुणो वसीकरणं महादोसाय होज्जा। अहवा अम्हाणं पि गहियसव्वविरईणं महव्वइणीणं एवं कम्मणाइपयोगकरणं न समुइयं। तुमं जं भोगट्ठं वसीकरणं करावेसि, ते भोगा संसारिजीवाण दुक्खहेयवो। किंपागफलसरिसा विसया पारंभरमणिज्जा, परिणामे अइदारुणा निरयाइदुग्गइदुहदायगा। दीहकालं सेविया वि विसया न तित्तिजणगा, अओ एवं विसयाभिलासं चइत्ता जिणवरवुत्तं सुद्धधम्मं समायराहि। जेण सव्वट्ठसिद्धी होज्जा "।

एवं सुव्वयासाहुणीमुहाओ उवएसं सोया तीए तव्वयणं पडिवण्णं। भत्तुस्स अणुण्णं घेत्तूणं चारित्तं गहियं। पिएण वि मुत्तकोहेण वुत्तं - " धन्ना तुमं, जेण चारित्तं गहियं। अओ देवीभूयाए तुमए

मज्झ पडिबोहणट्ठं अवस्सं समागंतव्वं " । सा वि तं पडिवज्जित्ता भूमीए विहरित्था । चिर-कालं निरइयारं चरणं पालिऊणं सा देवत्तणेण उप्पन्ना । ओहिनाणेण पुव्वभवभत्तारं अवलोइऊणं पडिबोहिउं सो देवो समागओ। बहूहिं पि उवएसेहिं सो तेयलिपुत्तो पडिबोहं न पत्तो । तओ देवेण चिंतियं - " रज्जमोहेण एसो पडिबोहं न पावेइ " । अओ देवेण रण्णो चित्तविवज्जासो कओ । मंतिम्मि सहाए समागए परंमुहीहोइऊणं ठिओ राया दंसणं न देइ ।

तेयलिपुत्तेणं चिंतियं - " राया मज्झ उवरिं अईव रुट्ठो । दुट्ठेण केण वि किमवि मईयं छिद्दं कहियं विलोइज्जइ । अओ न याणेमि किं एसो काही ? केण वा मरणेण मं हणिस्सइ ? अप्पघायं काऊणं मरणं चिय वरं " - ति चिंतिऊणं तेण कंठंमि पासो दिण्णो । देवप्पहावेण सो तुट्टिओ । पुणो विसं भक्खियं, तं पि सुहा विव जायं । पुणो खग्गेण मत्थयं छिंदिउं पारद्धं, तइया वि देवेण खग्गधारा निबद्धा । पुणो अग्गिमज्झंमि पविट्ठो, अग्गी वि जलरूवेण परिणओ । एवं सव्वे वि मरणप्पयासा देवेण निप्फलीकया ।

पच्छा पयडीहोऊणं पोट्टिला देवी भासित्था - " एयं सव्वं मए कयं । किमट्ठं तुमं अप्पघायं कुणेसि ? चरित्तं गिण्हेहि " । तं सोच्चा तेयलिपुत्तपहाणेण चरित्तं गहियं । राया वि समागंतूणं चरणेसुं पडिऊणं नियं अवराहं खमावेइ । एवं मंतिमुणी बहुकालं भूमीए विहरित्ता चउद्दसपुव्वधरो होऊणं कमेण घाइकम्मक्खएणं केवलनाणं आसज्ज मुत्तिपयं पावित्था ।

इत्थं पिया रज्जलोहेण पुत्ताणं पि विडंबणं विहेइ त्ति पिउणो वि सिणेहो कारिमो वियाणियव्वो त्ति । उवएसो - **इहयं पिउस्स नेहं, नाऊणं कारिमं तुमे भविया ! ।**
**तह उज्जमेह जेणं, इहपरलोए सया सोक्खं ॥**

**- उवएसमालाए**

**रज्जलोहेण पुत्ताणं पि विडंबणाकारग-कणयकेउनरिंदस्स कहा समत्ता ॥**

*****

## (४)

## तामसी विज्जागहणंमि विउसमाहणस्स कहा

जा विज्जा पारंभे, अच्छेरविहाइणी वि पज्जंते ।
असुहकरी सा हेया, नियंसणं माहणो इहयं ॥ १ ॥

इह जगंमि दइवी तामसी य दोण्णि विज्जाओ संति । तत्थ दइवी विज्जा इह परलोगहियकरी, तामसी य विज्जा आसुरीरूवा असुराणं पिव इह लोगंमि किंचि अच्छेरपयंसणी वि भयंकरी, जओ

पज्जंतकाले संकिलेसकारिणी एगंतदुक्खदाइणी य, परलोगंमि पुण दुग्गइफल-संपायणी धम्मभंसविहाइणी सा मइलरूवा सव्वहा चइयव्वा । इह माहणविउस्स नायगं -

**सोरट्ठदेसे गोंडल**नयरासन्नगामम्मि एगो **हरिसंकरो** नाम माहणो निवसेइ । सो **वाराणसी**ए नयरीए वागरण-तक्क-साहिच्च-वेय-पुराणपमुहसव्वसत्थाइं भणिऊणं सयलसत्थ-पारंगओ संजाओ । एयारिसो अन्नो को वि विउसो नत्थि, जओ तेण सद्धिं सत्थचिंतणं कुणेज्जा, एवं समाणे वि सो स-सम्माणवड्ढणे सइ तल्लिच्छो होत्था ।

एगया गोंडलनयरंमि भागवयसत्ताहपाराणस्स सम्मं आयोजणं होसी । तहिं बहवो विउस-वरा समागच्छित्था । सो वि बंभणवरो एयंमि समायोजणम्मि समागओ । गोंडलम्मि नियउत्तारगे समागंतूणं नियवत्थूई सम्मं निरूवेइ । तइया भागवयस्स ठाणंमि महाभारहं निग्गयं । अण्णे विउसा नियनियभागवयं गहिऊणं समागया । सो बम्हणपंडिओ चिंतेइ - " मए किं कायव्वं ? नियगामं गंतूणं भागवयाणयणसमओ अहुणा नत्थि, कल्लंमि विउसवुंदालंकियसहाए किं करिस्सं ? " - एवं सो अईव वाउलो संजाओ ।

तइया मज्झण्हसमयंमि एगो हरिजणो पहसंमज्जणट्ठं तहिं समागओ । सो मुहागारेण तं विउसवरं अईव चिंतामग्गं दट्ठूणं पुच्छेइ - " भो महाराय ! कम्मि वि कट्ठम्मि पडिओ किं ? " । पुव्वं पंडिओ किं पि न वएइ, परंतु पुणरुत्तं पुच्छिज्जमाणो सो साहेइ - " नियगामाओ इहागमणे पमाएणं भागवयट्ठाणे महाभारहं समागयं । मम गामो इओ नवकोसपज्जंते दूरं वट्टेइ । तहिं गंतूणं इहाऽऽगमणकालो अहुणा नत्थि । अओ किं कायव्वं ? - ति विमूढो अहं जाओ म्हि " । सो हरिजणो कहेइ - " एयकज्जम्मि अलं वियारणाए । तुव भागवयं एत्थ अहं आणेमि " । विउसो वएइ - " असक्कं इमं, एयं दूरयराओ इह कहं समागच्छेज्जा ? इह गामाओ अन्नस्स कास वि आणेउं सुलहं, न मईयं भागवयं " । सो हरिजणो वएइ - " तुम्ह गामाओ तुम्हेच्चिय घराओ तुम्हकेरं चिय भागवयं हं आणेमि, न अन्नस्स । केवलं तुम्हे पंचक्खणं जाव नयणाई निमीलित्ता चिट्ठेह । तुम्हेच्चयं भागवयं अवस्सं इहमेव आगच्छिस्सइ " ।

तइया असद्दहंतो वि स अक्खीइं निमीलिऊणं खणं संठिओ । खणंतरंमि तस्सेव भागवयं तस्समीवंमि आवडियं । तेण उग्घाडिएहिं नयणेहिं समागयं नियं भागवयं दिट्ठं । संपत्तच्छेरो सव्व-सत्थपारंगओ स विउसो चिंतेइ - " एसो हरिजणो सिद्धमंतो अत्थि " । तओ तम्मंतगहणलालसो हरिजणं साहेइ - " मम एयं मंतप्पयाणं कुणेह " । तेण तस्स मंतपयाणं अंगीकयं । विउसस्स मंतसाहणसामग्गिं उवदंसिऊणं - " ताइं घेत्तूणं राईए मसाणमज्झे आगंतव्वं " ति कहियं । सो विउसो उवयोगिसव्वसंभारे घेत्तूणं मसाणंमि आगओ ।

हरिजणो वि तहिं तं अविक्खंतो संठिओ आसि । तओ ते दोण्णि मसाणस्स एगंतठाणंमि गया । हरिजणो तहिं भूमीए छुरिगाए एगं महंतं वट्टुलं विहेऊणं तम्मज्झम्मि विउसं ठविऊणं साहेइ - " तुमं भयरहिओ होऊणं मए वुत्ताइं मंतपयाइं सम्मं वएज्जासि " । तओ हरिजणेण मंतपओगो समारद्धो । समयंतरेण तेण पुट्ठं - " किं किमवि दीसइ ? ", बम्हणविउसेण वुत्तं - " मए किं पि न पासिज्जइ " । एयं सोच्चा - " एयं कहं जायं " ति वियारंतो सो मइलविज्जादेवं तक्कारणं पुच्छित्था । तेण आसुरीविज्जादेवेण वुत्तं - " एस बम्हणो पवित्तयमो सत्थपारगओ अत्थि । एयंमि बम्हतेयं अत्थि । तेण तेयसा अम्हे डज्झामो । तओ तुमं तस्स बम्हणत्तणं दूरं करावसु । पुव्वं तु जम्मि चम्माइं पक्खालिज्जंति, तस्स चम्मकारकुंडस्स जलं तं पिवावसु, जेण सो अपवित्तो भविस्सइ । तेण तस्स सुहवियारा असुहत्तणेण परिणया भविस्संति । सत्थपारंगयया वि तस्स दूरीहोहिइ । तइया तस्स विज्जा सिज्झिहिइ " । इमं वुत्तं सो बंभणस्स कहेइ ।

सो बम्हणो चिंतेइ - " अरे ! अहं विमूढो होऊणं कहं इहं समागओ ? पढियसव्व-धम्मसत्थो अहं माहणत्तणं कहं चएमि ? अलाहि इमीए आसुरीविज्जाए " । एवं पच्छातावं कुणंतो हरिजणं मंतपढणट्ठं निसेहित्ता वएइ - " धम्मभंसविहाणीए एयाए विज्जाए मम पयोजणं नत्थि " । हरिजणो वएइ - " पंडियवर ! अहुणा आसुरीविज्जाए बहुपहावो दीसइ । रायराएसरा वि तयहीणा चेव वट्टेइरे । सत्तुविणासणट्ठं जुवइजणवसीकरणट्ठं च मलिणविज्जापओगो कराविज्जइ । जंमि एसा मइलविज्जा मुंचिज्जइ, सा तं समूलं विणासेइ " । पंडिओ साहेइ - " कासीए एयारिसमलिण-विज्जासाहगा बहवो जणा दिट्ठा । ते सव्वे मंस-मज्जमि पसत्ता, उम्मग्गगामिणो होऊणं पज्जंते सारीरिय-माणसियदुक्खद्दिया असमाहिभावपत्ता सुणिज्जंति । अओ अलं इमाए मइलविज्जाए त्ति वोत्तूणं नियगामंमि समागओ सत्थत्थचिंतणपरो नियधम्ममि दिढयरो संजाओ ।

उवएसो -

**बंभणविउसस्सकहं, जणाण सम्मग्गदंसणट्ठाए ।**
**सोच्चा भविया तुम्हे, जह स-परहियं तहा जयह ॥** - गुज्जरभासाकहाए

**तामसीविज्जागहणंमि विउसमाहणस्स कहा समत्ता ॥**

*****

प्राकृतविभागः

# भोजराय-दासी-संवाओ

- सा. हेमपूर्णाश्रीः

**भोजराया** रे दासि ! मम भोयणं देसु।

**दासी** अहं भोयणं देउं ण अरिहेमि, जओ मे सूतगं वट्टइ।

**भोजराया** किंणिमित्तं सूतगं वट्टइ – जम्मं मरणं वा ?

**दासी** जम्मणिमित्तं सूतगं सामिय !

**भोजराया** किं जायं तुह – पुत्तो वा पुत्ती वा ?

**दासी** पुत्तो जाओ मे।

**भोजराया** कइया ते सूतगं पुण्णं भविस्सइ ?

**दासी** जइया सो पुत्तो मरिस्सइ तया मे सूतगं पुण्णं भविस्सइ।

**भोजराया** को सो पुत्तो ?

**दासी** मह दालिद्दणामगो पुत्तो जाओ त्थि। सो जइया मरिस्सइ तया मे सूतगं पुण्णं भविस्सइ।

एयं सोऊण हरिसिएण भोजराएण तीए दासीए बहुं धणं दिण्णं जेण तीसे दालिद्दणामगो पुत्तो मओ तीए य सूतगं पुण्णं जायं।

---



जनाः पुस्तकसृदशा भवन्ति ।
केचन मुखपृष्ठेन वञ्चयन्ति अस्मान्,
अन्ये तु अन्तःस्थितसामग्र्याऽस्मान् चकितान् कुर्वन्ति ॥